# Suggested Curriculum for Sanskrit

## Class 5 - 8

EKLAVYA SANSKRIT ACADEMY

॥जयतु संस्कृत जयतु भारतम्॥

Core House, Off CG Road Ahmedabad 380 006 India
**website:** eklavyasanskritacademy.org • **e-mail:** mihiresa@gmail.com • **Mobile:** (91) 98246 16237

April 2015

|| जयतु संस्कृतं जयतु भारतम् ||

**EKLAVYA SANSKRIT ACADEMY**

प्रति, 21 April 2015

आचार्यश्री ,

विषय: - १ त: ८ कक्ष्याया: संस्कृतभाषाया: अभ्यासक्रम: |

श्रीमन् ,

एकलव्य संस्कृत एकेडेमी एकदशकात् संस्कृतभाषाक्षेत्रे कार्यरतास्ति | एकलव्य संस्कृत एकेडेमी संस्कृतभाषाया: प्रचाराय जु.केजीत: आरभ्य ज्येष्ठानां कृते अनेकान् अभ्यासक्रमान् संचालयति | सोमनाथ संस्कृत विश्वविद्यालयेन सह **"Diploma in Sanskrit Teaching"** अभ्यासक्रमेण संस्कृतशिक्षकेभ्य: प्रशिक्षणं ददाति | एवं च "संस्कृतसाम्प्रतम्" इति मासिकी□त्रिकया साहित्यजगति अ□ि प्रदानं करोति |

वर्तमानयुगं बहुकौशलयुगं वर्तते | छात्रेभ्य: बहुकौशलज्ञानम् अनिवार्यम् अस्ति | प्रसंगेस्मिन् संस्कृतभाषाया: विशेषं महत्वं वर्तते | अन्यविषयस्य ज्ञानं प्राप्तुं संस्कृतभाषाया: ज्ञानं छात्राणां साहाय्यं करोति | अत: शालासु प्रथमकक्ष्यात: एव संस्कृतभाषाया: शिक्षणं भवेत् इति शिक्षणशास्त्रीभि: निर्दिष्टं वर्तते | अनेकै: शिक्षासंस्थानै: प्रथमकक्ष्यात: संस्कृतभाषाया: शिक्षणस्य इच्छा प्रदर्शिता वर्तते | एतत् अवलोक्य एकलव्य संस्कृत एकेडेमीसंस्थानेन १ त: ८ कक्ष्याया: संस्कृतभाषाया: अभ्यासक्रम: निर्मित: अस्ति |

श्रवणं,कथनं,वाचनं,लेखनं च इति भाषाया: चत्वारि सो□ानानि यदि सिद्धयन्ति तर्हि भाषाया: ज्ञानं सम्भवति | एतानि भाषासो□ानानि अनुश्रुत्य छात्रा: संस्कृतभाषाया: ज्ञानं प्राप्नुयु: इति मनसि कृत्वा एकलव्य संस्कृत एकेडेमीसंस्थानेन अयम् अभ्यासक्रम: रचित: अस्ति | एतस्य अभ्यासक्रमस्य केन्द्रस्थाने संस्कृतभाषाया: अध्या□नं वर्तते | अभ्यासक्रमोयं वयं भवतां कृते प्रेषयन्त: स्म: | एष: अभ्यासक्रम: संस्कृतभाषाया: ज्ञानं प्राप्तुं शिक्षकानां छात्राणां च साहाय्यं करिष्यति इति अस्माकं शुभाषय: |

धन्यवाद:

प्रा. मिहिर उ□ाध्याय:

निदेशक:

एकलव्य संस्कृत एकेडेमी

EKLAVYA SANSKRIT ACADEMY

|| जयतु संस्कृतं जयतु भारतम् ||

પ્રતિ, 21 April 2015

આચાર્યશ્રી,

**વિષય : ધોરણ 1 થી 8 નો સંસ્કૃત ભાષાનો અભ્યાસક્રમ મોકલવા બાબત.**

શ્રીમાન,

ઉપરોક્ત વિષયે જણાવવાનું કે, એકલવ્ય સંસ્કૃત એકેડમી છેલ્લા એક દાયકાથી સંસ્કૃત ભાષાના ક્ષેત્રમાં કાર્યરત છે. સંસ્કૃત ભાષાના પ્રચાર અને પ્રસારને માટે જુ.કેજી થી માંડીને સીનીયર સીટીઝન માટેના વર્ગો ચલાવે છે. સોમનાથ સંસ્કૃત યુનિવર્સિટી સાથેના જોડાણથી "Diploma in Sanskrit Teaching" અભ્યાસક્રમ દ્વારા સંસ્કૃત શિક્ષકોને પ્રશિક્ષણ આપે છે. આ ઉપરાંત શૈક્ષણિક ક્ષેત્રે "સંસ્કૃતસામ્પ્રતમ" નામના માસિક મેગેઝિન દ્વારા સાહિત્ય ક્ષેત્રે પ્રદાન કરી રહી છે.

વર્તમાનયુગ બહુકૌશલ્યયુગ છે. આ યુગ સાથે તાલ મિલાવવા માટે બાળકને બહુ કૌશલ્ય વર્ધન જ્ઞાન આપવું જરૂરી બની જાય છે. આ સંદર્ભમાં સંસ્કૃતભાષા મહત્વનો ભાગ ભજવે છે. સંસ્કૃત ભાષાનું જ્ઞાન બાળકને અન્ય ભાષાઓ અને અન્ય વિષયના જ્ઞાનની પ્રાપ્તિમાં મદદરૂપ નીવડે છે. અને એથીજ ઘણા શિક્ષણ શાસ્ત્રીઓ એ સંસ્કૃત ભાષાનું અધ્યાપન શાળામાં પહેલા ધોરણથી થવું જોઇએ એવો મત દર્શાવ્યો છે. ઘણા શિક્ષણ સંસ્થાનોએ પહેલા ધોરણથી શિક્ષણનું અધ્યાપન કરાવવાની ઇચ્છા પણ દર્શાવી છે. આ બાબતને ધ્યાનમાં લેતા એકલવ્ય સંસ્કૃત એકેડમી દ્વારા ધોરણ 1 થી 8 સુધીનો સંસ્કૃત ભાષાનો અભ્યાસક્રમ તૈયાર કરવામાં આવ્યો છે.

ભાષાના મુખ્ય ચાર કૌશલ્યો શ્રવણ , કથન, વાચન અને લેખન સિદ્ધ થાય ત્યારે જ તે ભાષા પૂર્ણ રીતે આત્મસાત કરી શકાય છે. સંસ્કૃત ભાષાને પણ બાળકો તેના ચારેય કૌશલ્યો સાથે રસપ્રદ રીતે સરળતાથી આત્મસાત કરી શકે તે હેતુથી એકલવ્ય સંસ્કૃત એકેડમી દ્વારા ધોરણ 1 થી 8 માટે અભ્યાસક્રમનું સૂક્ષ્મ માળખું તૈયાર કરવામાં આવ્યું છે. આ અભ્યાસક્રમના કેન્દ્રમાં સંસ્કૃત ભાષાનું અધ્યાપન છે. આ અભ્યાસક્રમ આપને મોકલવામાં આવે છે, જે વિદ્યાર્થીઓ અને શિક્ષકોને આ ભાષાને આત્મસાત કરવામાં મદદરૂપ નીવડશે.

આભાર

પ્રા.મિહિર ઉપાધ્યાય

નિદેશક

એકલવ્ય સંસ્કૃત એકેડમી

# Sanskrit Curriculum

## Class - 5

# प्रथमं सोपानम्

**पाठबिन्दुः**

| | | |
|---|---|---|
| - सः | - सा | - तत् |
| - एषः | - एषा | - एतत् |
| - कः | - का | - किम् |

**पाठ्योपकरणानि –**

(१) देवानां / राष्ट्रनायकानां / वस्तूनां च चित्राणि – (पुरुषाणां चित्राणि – ५, स्त्रीणां चित्राणि – ५, नपुंसकलिङ्गशब्दवाच्यानि वस्तूनि – ५)

(२) अन्यानि अपि बहूनि नित्योपयोगिवस्तूनि ।
यथा – फेनकम्, उपनेत्रम् इत्यादीनि ।

**पाठनक्रमः–**

**उपस्थापनम् –**

- दूरे स्थापितानि पुरुषाणां चित्राणि प्रदर्श्य 'सः' इत्यस्य उपस्थापनम् ।
- दूरे स्थापितानि स्त्रीणां चित्राणि प्रदर्श्य 'सा' इत्यस्य उपस्थापनम् ।
- दूरे स्थापितानि वस्तूनि (नपु.) प्रदर्श्य 'तत्' इत्यस्य उपस्थापनम् ।

**अभ्यासः**

- दूरस्थानि पुरुषचित्राणि प्रदर्श्य 'सः कः ?' इत्यादयः प्रश्नाः । (छात्राणाम् उत्तराणि)
  यथा – शिक्षकः – सः कः ?
  छात्राः – सः विवेकानन्दः ।
- दूरस्थानि स्त्रीचित्राणि प्रदर्श्य 'सा का ?' इत्यादयः प्रश्नाः । (छात्राणाम् उत्तराणि)
  यथा – शिक्षकः – सा का ?
  छात्राः – सा लक्ष्मीबाई ।
- दूरस्थानि वस्तूनि (नपुं) प्रदर्श्य 'तत् किम् ?' इत्यादयः प्रश्नाः । (छात्राणाम् उत्तराणि)
  यथा – शिक्षकः – तत् किम् ?
  छात्राः –तत् द्वारम् ।

**प्रयोगः** – दूरस्थानि पुरुषचित्राणि प्रदर्श्य पुल्लिङ्गप्रश्नान्, स्त्रीचित्राणि प्रदर्श्य स्त्रीलिङ्गप्रश्नान्, वस्तूनि प्रदर्श्य नपुंसकलिङ्गप्रश्नान् च छात्राः पृच्छेयुः ।

**अवधातव्याः अंशाः – लिङ्गभेदः स्पष्टः भवेत् ।**

- दूरम् अभिनयेन स्पष्टीकरणीयम् ।
- नपुंसकपाठनार्थं नपुंसकलिङ्गविशिष्टवस्तूनि एव स्वीकरणीयानि ।

**विशेषः** – नित्योपयोगिवस्तूनां नामकथने छात्राः Soap, Tooth paste इत्यादीनां मातृभाषाशब्दान् वा वदेयुः । आरम्भे ते अङ्गीकरणीयाः ।

**पाठबिन्दुः**

**एषः - एषा - एतत्**

**पाठ्योपकरणानि**– तच्छब्दे यादृशानि उपयुक्तानि तादृशानि।

**पाठनक्रमः**–

**उपस्थापनम् -**

- पुरुषाणां चित्राणि समीपम् आनीय 'एषः' इत्यस्य उपस्थापनम्।
- स्त्रीणां चित्राणि समीपम् आनीय 'एषा' इत्यस्य उपस्थापनम्।
- वस्तूनि (नपुं) समीपम् आनीय 'एतत्' इत्यस्य उपस्थापनम्।

**अभ्यासः**

- समीपस्थानि पुरुषचित्राणि प्रदर्श्य प्रश्नाः। (छात्राणाम् उत्तराणि)
- यथा – शिक्षकः – एषः कः ?

  छात्राः – सः महात्मा गान्धी।
- समीपस्थानि स्त्रीचित्राणि प्रदर्श्य प्रश्नाः। (छात्राणाम् उत्तराणि)
- यथा – शिक्षकः – एषा का ?

  छात्राः – सा निवेदिता।
- समीपस्थानि वस्तूनि (नपुं) प्रदर्श्य प्रश्नाः। (छात्राणाम् उत्तराणि)
- यथा – शिक्षकः – एतत् किम्?

  छात्राः –तत् पर्णम्। (एतच्छब्दयुक्तः अध्यापकस्य प्रश्नः। तच्छब्दयुक्तं छात्रस्य उत्तरम्।)

**प्रयोगः -**

- समीपस्थानि पुरुषचित्राणि प्रदर्श्य पुंल्लिङ्गप्रश्नान्, स्त्रीचित्राणि प्रदर्श्य स्त्रीलिङ्गप्रश्नान्, वस्तूनि प्रदर्श्य नपुंसकलिङ्गप्रश्नान् च छात्राः पृच्छेयुः।
- दूरे समीपे वा स्थित्वा शिक्षकः वस्तूनि दर्शयेत्। छात्रः तदनुगुणं वाक्यं वदेत्।

**अवधातव्याः अंशाः**

- लिङ्गभेदः स्पष्टः भवेत्।
- सामीप्यम् अभिनयेन स्पष्टीकरणीयम्। 'सः' इत्यस्य पाठने यथा सूचितं तथैव।
- 'एषः', 'एषा', 'एतत्' इत्येतेषां पाठनावसरे प्रश्नसमये छात्रसमीपे एव स्थातव्यं, न तु दूरे।
- वैयक्तिकोत्तरमेव अपेक्षणीयं, न तु सामूहिकम्।

**विशेषः -**

एषः, एषा, एतत् इत्यादीनां पाठनसमये क्रमः न परिवर्तनीयः, नो चेत् छात्रैः तच्छब्दम् उपयुज्य उत्तरं वक्तव्यं भवति, यदनपेक्षितम्।

# सम्भाषणम्

## अध्यापक-छात्रसंवादः

| | | |
|---|---|---|
| **अध्यापकः** | - | अभिषेक ! एतत् किम् ? |
| **अभिषेकः** | - | एतत् कृष्णफलकम्। |
| **अध्यापकः** | - | अंश ! कृपया उत्तिष्ठतु। एषः कः ? |
| **अंशः** | - | एषः मम अग्रजः देवः। |
| **अध्यापकः** | - | प्रणीते, सा का ? |
| **प्रणीता** | - | सा लावण्या। |
| **अध्यापकः** | - | समीक्षे ! तत् किम् ? |
| **समीक्षा** | - | तत् व्यजनम्। |
| **अध्यापकः** | - | उदितांशि ! सः कः? |
| **उदितांशी** | - | सः प्रधानाचार्यः। |
| **अध्यापकः** | - | विदिशे ! एषा का? |
| **विदिशा** | - | एषा मम सखी ईशा। |
| **अध्यापकः** | - | अस्तु शोभनम्। सर्वे पठन्तु। |

## स्वाध्यायः

* एषः/एषा/एतत् वा योजयित्वा वाक्यानि रचयन्तु ।
* सः/ सा/तत् वा योजयित्वा वाक्यानि रचयन्तु ।

| | |
|---|---|
| १. .......... छात्रः। | १. .......... वैज्ञानिकः। |
| २. .......... शिक्षिका। | २. .......... पुष्पम्। |
| ३. .......... कृष्णफलकम्। | ३. .......... उपनेत्रम्। |
| ४. .......... वैद्यः। | ४. .......... लेखनी। |
| ५. .......... सुवर्णकारः। | ५. .......... आसन्दः। |
| ६. .......... व्यजनम्। | ६. .......... उत्पीठिका। |
| ७. .......... जननी। | ७. .......... प्रौञ्छनम्। |
| ८. .......... महिला। | ८. .......... कृषकः। |
| ९. .......... वातायनम्। | ९. .......... सखी। |
| १०. .......... विद्यालयः। | १०. .......... द्वारम्। |
| ११. .......... नदी। | ११. .......... अंकनी। |
| १२. .......... द्रोणी। | १२. .......... चटका। |
| १३. .......... यन्त्रम्। | १३. .......... वस्त्रम्। |
| १४. .......... शाटिका। | १४. .......... कक्षा। |
| १५. .......... पुस्तकम्। | १५. .......... भगिनी। |

# द्वितीयं सोपानम्

* अस्ति - नास्ति
* अत्र - तत्र - कुत्र - सर्वत्र - अन्यत्र
* अहम् - भवान् - भवती

**पाठबिन्दुः** - अस्ति - नास्ति

**पाठ्योपकरणम् –**

**पुस्तकम्, उपनेत्रम्, घटी इत्यादीनि नित्योपयोगीनि वस्तूनि ।**

**पाठनक्रमः–**

**उपस्थापनम्–**

- घटीम् अन्यत् किमपि वस्तु वा सर्वे यथा पश्येयुः तथा गृहीत्वा 'घटी अस्ति' इति कथनम् । घटीं यथा न पश्येयुः तथा गृहीत्वा 'घटी नास्ति' इति कथनम् । एवमेव वस्तूनां समीपे दूरे वा स्थापनेन प्रश्नेन अन्येषामपि उपस्थापनम् ।

**अभ्यासः –**

१. शिक्षकेण दर्शितुं वस्तु दृष्ट्वा छात्राः 'घटी अस्ति, फेनकम् अस्ति' – इत्यादीनि वाक्यानि वदेयुः । शिक्षकः अविद्यमानानां वस्तूनां नाम यदि वदति तर्हि 'नास्ति' इति वदेयुः ।
२. वस्तूनि समीपे, दूरे, अन्यत्र च स्थापयित्वा तद्विषये प्रश्नकरणेन अभ्यासः कारणीयः ।

**प्रयोगः–** छात्राः कक्ष्यास्थानि वस्तूनि दृष्ट्वा 'द्वारं तत्र अस्ति, लेखनी अत्र अस्ति, वायुः सर्वत्र अस्ति' इत्यादीनि वाक्यानि वदेयुः ।

**अवधातव्याः अंशाः** - अभिनये यदि अस्पष्टता भवति तर्हि अत्र – तत्र – अन्यत्र इत्यादीनां विषये छात्राणां भ्रमः भवति । अतः स्पष्टाभिनयेन तादृशः भ्रमः निवारणीयः ।

**पाठबिन्दुः – अहम् - भवान् - भवती**

**पाठ्योपकरणम्** – शिक्षकस्य अभिनयः एव ।

**पाठनक्रमः –**

**उपस्थापनम् –**

- आत्मानं निर्दिश्य – अहं ................ । (स्वस्य नाम वक्तव्यम्)
- छात्रम् उद्दिश्य पश्नः – 'भवान् कः ?' (त्रिवारम्)
- पुनः 'अहं ................ ।' इति उक्त्वा बालिकाम् उद्दिश्य प्रश्नः – 'भवती का ?' (त्रिवारम्)

**अभ्यासः**

गुणवाचकशब्दान् उपयुज्य अध्यापकः उत्तरकथनपुरस्सरं प्रश्नं पृष्ट्वा छात्राणाम् उत्तराणि प्राप्नुयात् ।

यथा – शिक्षकः अहं धीरः । भवान् कः ?

छात्रः – अहं देशभक्तः ।

**प्रयोगः** – एकः शिक्षार्थी उत्थाय – ‘अहं ................ ।’ इति उक्त्वा – ‘भवान कः ?’ / ‘भवती का ?’ इति अन्यान् पृष्ट्वा उत्तरं प्राप्नुयात् ।

**अवधातव्याः अंशाः** – शिक्षार्थीनां मुखात् वाक्यानि वाचयितुं वृत्तिवाचकाः, गुणवाचकाः च सहायकशब्दाः अध्यापकेन दातव्याः । ते च पूर्वम् एव सङ्ग्रहणीयाः ।

## सम्भाषणम्

छात्रसंवादः

**सतीशः** - विजय ! भवतः समीपे संस्कृतपुस्तकम् अस्ति वा ?
**विजयः** - आम् संस्कृतपुस्तकम् अस्ति किन्तु टिप्पणीपुस्तकम् नास्ति ।
**सतीशः** - भवतः टिप्पणीपुस्तकम् कुत्र अस्ति ?
**विजयः** - मम टिप्पणीपुस्तकम् अन्यत्र अस्ति ।
**सतीशः** - अस्तु भवान् विद्यालयतः कुत्र गच्छति ?
**विजयः** - अहम् विद्यालयतः आपणं गच्छामि । भवान् कुत्र गच्छति ?
**सतीशः** - अहम् अपि तत्र आगच्छामि ।
**विजयः** - अस्तु , मिलामः ।

## स्वाध्यायः

* **भवतः गृहे किम् अस्ति / किं नास्ति इति लिखन्तु ।**

| | |
|---|---|
| १. दूरदर्शनम् ----------- । | ११. वातानुकूलम् ----- - । |
| २. गजः ----------- । | १२. दूरवाणी -------- । |
| ३. कपाटः ------------ । | १३. घटी --------- । |
| ४. आसन्दः ------------- । | १४. पर्यंकः --------- । |
| ५. वृक्षः ------------ । | १५. उष्ट्रः ----------। |
| ६. सिंहः ----------- । | १६. नदी ---------- । |
| ७. व्यजनम् ----------- । | १७. श्रृगालः ---------- । |
| ८. शुकः -------------- । | १८. पुस्तकम् ---------- । |
| ९. श्वानः ------------- । | १९. मीनः ---------- । |
| १०. मार्जारी ----------- । | २०. पाकशाला ----------- । |

# तृतीयं सोपानम्

* षष्ठीविभक्तिः ( सर्वनाम )
* तस्य - एतस्य - कस्य ?
* तस्याः - एतस्याः - कस्याः ?
* षष्ठीविभक्तिः ( सर्वनामरुपाणि ) [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]
* क्रियापदपरिचयः । ( वर्तमाने अन्य पु. ए.व, उत्तम पु. ए.व )
* ते - एते - के / ताः - एताः - काः / तानि - एतानि – कानि
* भवान् - भवन्तः / भवती - भवत्यः / अहं - वयम्

**पाठबिन्दुः** - **तस्य - कस्य - एतस्य, तस्याः - कस्याः - एतस्याः**

**पाठ्योपकरणम्** - देवानां / महापुषाणां च चित्राणि – (पुरुषाणां स्त्रीणां चापि चित्राणि भवेयुः ।)

**पाठनक्रमः** –

**उपस्थापनम्** – कक्ष्यातः कञ्चित् छात्रं पृथक्कृत्य किञ्चिद्दूरे संस्थाप्य तं प्रदर्शयता शिक्षकेण 'तस्य नाम .......' (राकेशः) इति कथनेन उपस्थापनं करणीयम् । ततः 'तस्य नाम किम् ?' इति प्रश्नः अपि करणीयः ।

- समीपस्थं चित्रं प्रदर्श्य समीपे स्थित्वा 'एतस्य नाम किम् ?' इति प्रश्नकरणेन उपस्थापनम् ।
- स्त्रीलिङ्गे अपि एवम् एव पाठनीयम् ।
- फेनकम्, पुस्तकम् – इत्यादीनि प्रदर्श्य 'एतस्य नाम किम् ?' इति प्रष्टव्यम् । (नपुंसकलिङ्गे)

**अभ्यासः** – शिक्षकः दूरस्थं समीपस्थं वा चित्रं प्रदर्शयन् दूरे समीपे वा स्थित्वा पुंल्लिङ्गप्रश्नान् च पृच्छेत् ।

**प्रयोगः** – अध्यापकः अङ्गुल्या चित्रं निर्दिशति । छात्रः प्रश्नम् उत्तरं च कथयति । (दूरस्थं समीपस्थं च निर्दिश्य, पुल्लिङ्गे – स्त्रीलिङ्गे च ।)

यथा – शिक्षकः – दूरस्थं रामस्य चित्रं दर्शयति ।

छात्राः – तस्य नाम किम् ? तस्य नाम रामः ।

**अवधातव्याः अंशाः**

- दूरसमीपयोः अवलम्बनेन अयं बिन्दुः पाठ्यते इत्यतः शिक्षकस्य अभिनयः स्पष्टः स्यात् ।
- 'एतस्य' इत्यस्य प्रयोगः यदा उत्तरे इष्यते तदा सामूहिकोत्तरं न निरीक्षणीयम् ।

**पाठनबिन्दुः** – **षष्ठीविभक्तिः – ( पुंल्लिंङ्गे – स्त्रीलिङ्गे – नपुंसकलिङ्गे च )**

**पाठ्योपकरणम् –**

- स्फोरकपत्राणि –
- अकारान्तपुल्लिङ्गसम्बद्धानि – १०
- अकारान्तनपुंसकलिङ्गसम्बद्धानि – १०
- आकारान्तस्त्रीलिङ्गसम्बद्धानि – १०
- ईकारान्तस्त्रीलिङ्गसम्बद्धानि – १०
- वाक्यपत्राणि (Chart)
- पितापुत्रसम्बन्धम् अवलम्ब्य – १
- लेखकग्रन्थसम्बन्धम् अवलम्ब –१

**पाठनक्रमः** –

**उपस्थापनम् –** प्रसिद्धान् पुराणादिसम्बन्धान् अवलम्ब्य उत्तरवाक्यानि उक्त्वा प्रश्नः करणीयः।

उदा– पुं. शिक्षकः – रामः दशरथस्य पुत्रः। रामः कस्य पुत्रः ?

छात्राः – रामः दशरथस्य पुत्रः।

स्त्री – १. शिक्षकः – रामः सीतायाः पतिः। रामः कस्याः पतिः ?

छात्राः – रामः सीतायाः पतिः।

२. शिक्षकः – गणेशः पार्वत्याः पुत्रः। गणेशः कस्याः पुत्रः ?

छात्राः – गणेशः पार्वत्याः पुत्रः।

नपुं – शिक्षकः – व्यासः महाभारतस्य लेखकः। व्यासः कस्य लेखकः ?

छात्राः – व्यासः महाभारतस्य लेखकः

**अभ्यासः** –

- प्रसिद्धान् पुराणादिसम्बन्धान् अवलम्ब्य बहवः प्रश्नाः प्रष्टव्याः। (पुंल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च)
- स्फोरकपत्राणि प्रदर्श्य रूपाणाम् अभ्यासः कारणीयः।

  यथा – स्फोरकपत्रे (रामः), छात्राः – रामस्य
- वाक्यपत्राणि प्रदर्श्य वाक्यानि वाचनीयानि।

**प्रयोगः** – प्रसिद्धसम्बन्धान् अवलम्ब्य अध्यापकः शब्दद्वयं वदति। छात्राः तदवलम्ब्य पूर्णवाक्यं रचयन्ति। (त्रिषु अपि लिङ्गेषु)

यथा – शिक्षकः – रामः – लवः।

छात्राः – रामस्य पुत्रः लवः।

**अवधातव्याः अंशाः -**

- अकारान्तपुंल्लिङ्गः, आकारान्तस्त्रीलिङ्गः, ईकारान्तस्त्रीलिङ्गः, अकारान्तनपुंसकलिङ्गः - इत्येते चतुर्विधशब्दाः एव स्वीकरणीयाः न तु इकारान्तोकारान्तादयः ।
- पुत्र-पुत्री-पति-पत्नी-पित्रादीन् सामान्यसम्बन्धान् अवलम्ब्य एव प्रश्नाः भवेयुः । दौहित्रादयः न अवलम्बनीयाः ।
- उदाहरणवाक्यानि बहूनि भवेयुः ।
- स्फोरकपत्राणि वाक्यपत्राणि च सुवाच्यैः स्थूलैः अक्षरैः वर्णलेखन्या लिखितानि स्युः । अन्यथा छात्राः दूरात् पठितुं न शक्नुयुः ।
- पाठारम्भात् पूर्वम् एव स्फोरकपत्राणि व्यवस्थितक्रमेण योजितानि स्युः ।

**<u>पाठबिन्दुः</u> - क्रियापदानि ( वर्तमानकाले, प्रथमपुरुषः )**

**पाठ्योपकरणम् —** शिक्षकस्य छात्राणां च अभिनयः

**पाठनक्रमः -**

**उपस्थापनम्** - शिक्षकः अभिनयेन कञ्चित् छात्रम् उत्थातुं सूचयति । ततः तम् अभिनयेन एव बहिः गन्तुं सूचयति । गच्छतं तं दृष्ट्वा 'मुकेशः गच्छति' इति वदति । छात्राः अपि तद् पुनरुच्चारयन्ति । एवमेव तम् अन्तः आहूय आगच्छतं तं दृष्ट्वा 'मुकेशः आगच्छति' इति उपस्थापनं करणीयम् । एवमेव छात्रद्वारा तां क्रियां कारयित्वा खादति, पिबति, लिखति, उत्तिष्ठति, उपविशति, क्रीडति, नयति, पश्यति - इत्यादीनि क्रियापदानि उपस्थापनीयानि ।

- शिक्षकः ताः क्रियाः स्वयमेव कुर्वन् 'अहं गच्छामि', 'अहम् आगच्छामि'... इत्यादिक्रमेण वदन् उत्तमपुरुषरूपाणाम् उपस्थापनं कुर्यात् ।

**अभ्यासः**

शिक्षकः क्रियाः कुर्वन् 'अहं गच्छामि, अहम् आगच्छामि, अहं पठामि...' इत्यादि वदति । तं दृष्ट्वा छात्राः 'भवान् गच्छति, भवान् आगच्छति, भवान् पठति...' इत्यादिक्रमेण वाक्यानि वदन्ति ।

**<u>बहुवचनम्</u>**

**<u>पाठबिन्दुः</u> - शब्दानां बहुवचनरूपाणि**

**पाठ्योपकरणानि** - एकस्य बहूनां च चित्राणि, नित्योपयोगीनि वस्तूनि च ।

**पाठनक्रमः-**

**उपस्थापनम्** - एकं बालकम् उत्थाप्य 'बालकः' इति वक्तव्यम् । तत्पश्चात् पञ्चषान् बालान् उत्पाथ्य 'बालकाः' इति शिक्षकः वदेत् । ततः 'पुरुषः - पुरुषाः' - इत्यादि चित्रसहितं फलकं दर्शयेत् । छात्राः चित्राणि दृष्ट्वा 'युवकः - युवकाः' इत्यादि उच्चारयेयुः । एवमेव बालिका - बालिकाः / लेखनी — लेखन्यः / पुस्तकं — पुस्तकानि - इति चतुर्विधाः अपि शब्दाः पाठनीयाः ।

**अभ्यासः** – सामूहिकः अभ्यासः – शिक्षकः चित्राणां शब्दानाम् एकवचनरूपं वदेत्। छात्राः बहुवचनरूपं वदेयुः।

यथा – शिक्षकः – लेखकः छात्राः – लेखकाः

**अवधात्याः अंशाः –**

- पाठसमये पूर्वोक्ताः चतुर्विद्याः शब्दाः एव पाठनीयाः, न तु अन्ये।
- तेषां पाठनेऽपि सः एव क्रमः अनुसर्तव्यः।
- बहुत्वेन येषां व्यवहारः लोके सामान्यतः नास्ति ते शब्दाः परिहृताः चेत् उत्तमम्।

यथा – जलानि, धनानि इत्यादयः (अन्यथा छात्राणां भ्रमः भवितुम् अर्हति।

**पाठबिन्दुः – ते – एते – के / ताः – एताः – काः / तानि – एतानि – कानि**
**भवान् – भवन्तः / भवती – भवत्यः / अहं – वयम्**

**पाठ्योपकरणानि –** बहुवचनपाठनार्थं यानि उपयुक्तानि, तानि एव।

**पाठनक्रमः –**

**उपस्थापनम् –** दूरस्थान् बालान् दर्शयित्वा 'ते बालाः' इति, समीपस्थान् बालान् बालानां चित्राणि वा दर्शयित्वा 'एते बालाः' – इति च उपस्थापनीयम्।

ताः – एताः, तानि – एतानि अपि तेनैव क्रमेण।

- 'भवान् – भवन्तः, भवती – भवत्यः' – इति तु एकं छात्रं छात्रगणं च पश्यता पाठनीयम्।
- आत्मानं स्वसमीपे स्थितान् अन्यान् द्वित्रान् च प्रदर्शयता 'अहं – वयम्' – इति पाठनीयम्।

**अभ्यासः –**

| | | |
|---|---|---|
| सः – ते | एषः – एते | कः – के |
| सा – ताः | एषा – एताः | का – काः |
| तत् – तानि | एतत् – एतानि | किम् – कानि |

एतस्य कोष्टकस्य आधारेण बहूनि वाक्यानि वाचनीयानि।

यथा – सः बालकः। ते बालकाः।

**प्रयोगः –** परिसरे विद्यमानानि वस्तूनि प्रदर्श्य छात्राः 'तानि व्यजनानि' 'ते वृक्षाः' इत्यादीनि वाक्यानि वदेयुः।

**अवधातव्यः अंशः –** सः – एषः, सा – एषा – स्पष्टोच्चारणेन एतयोः भेदः ज्ञापनीयः।

**विशेषः –** इदम् – अदस् – इत्यादयः अपि शब्दाः यद्यपि सन्ति, तथापि अत्र प्रयोगसौकर्यं मनसि निधाय एतत्शब्दः स्वीकृतः अस्ति। अन्यच्च तत्शब्दस्य रूपाणि यदि ज्ञातानि भवन्ति तर्हि पृष्ठतः 'ए' इति वर्णस्य योजनमात्रेण एतत्शब्दस्य रूपाणि अपि ज्ञातानि भवन्ति।

यथा – सः – एषः (षः) – सा – एषा (षा) ते – एते, ताः – एताः।

**पाठबिन्दुः क्रियापदानां बहुवचनरूपाणि**

**पाठ्योपकरणम्** – क्रियापदकोष्टकम्, स्फोरकपत्राणि (सर्वनामपदानाम्)

**पाठनक्रमः–**

**उपस्थापनम्** – पञ्च छात्रान् उत्थाप्य प्रेषयित्वा तेषां गमनं दर्शयता शिक्षकेन 'बालाः गच्छन्ति' इति उपस्थापनं करणीयम्। एवमेव आगच्छन्ति, उपविशन्ति, पठन्ति, लिखन्ति – इत्यादीनामपि। एवमेव त्रिचतुरान् उत्थाप्य तैः सह गच्छता 'वयं गच्छामः' इति उत्तमपुरुषबहुवचनस्य उपस्थापनं करणीयम्।

**अभ्यासः–** कोष्टकस्य साहाय्येन एकवचनतः बहुवचनं प्रति परिवर्तनस्य अभ्यासः कारणीयः।

यथा – बालकः पठति। — बालकाः पठन्ति।

अहं लिखामि। – वयं लिखामः।

**प्रयोगः–** जनाः गच्छन्ति, बालकाः क्रीडन्ति, वयं पठामः इत्यादिवाक्यानि छात्राः स्वयं वदेयुः।

**अवधातव्यः अंशः** – ददाति, जानाति, करोति, श्रृणोति, गृह्णाति – इत्येतेषां बहुवचनरूपेषु भेदः अस्ति। तानि 'गच्छन्ति' इव न। अतः तद्विषये विशेषावधानं दत्त्वा पाठनीयम्।

## सम्भाषणम्

### आपणिक-ग्राहकसंवादः

**ग्राहकः** - भोः ! एतस्य आलुकस्य किं मूल्यम् ?

**आपणिकः** - प्रतिकिलो पञ्चरुप्यकाणि ।

**ग्राहकः** - अस्तु , तस्य कुष्माण्डस्य किं मूल्यम् ?

**आपणिकः** - एतस्य मूल्यं सप्तरुप्यकाणि । एतत् स्वीकरोतु मूल्यम् अपि न्युनम् अस्ति ।

**ग्राहकः** - मास्तु भोः !गृहे एतस्य शाकं न कोऽपि खादति। अस्तु तस्याः तुम्ब्याः किं मुल्यम् ।

**आपणिकः** - एतस्याः तुम्ब्याः अष्टरुप्यकाणि मूल्यम् अस्ति ।

**ग्राहकः** - भोः ! तस्य फलस्य नाम किम् ?

**आपणिकः** - किम् एतस्य फलस्य विषये पृच्छति ?

**ग्राहकः** - आम् । तस्य विषये एव पृच्छामि ।

**आपणिकः** - एतत् कपित्थम् अस्ति ।

**ग्राहकः** - तस्य किं मूल्यम् ?

**आपणिकः** - प्रतिफलं पञ्चदशरुप्यकाणि ।

**ग्राहकः** - अस्तु तर्हि एककिलो आलुकम् , अर्धकिलो तुम्बीम् , एकं कपित्थम् च ददातु । आहत्य कति रुप्यकाणि ?

**आपणिकः** - आहत्य चतुःविंशति रुप्यकाणि ।

**ग्राहकः** - धनं स्वीकरोतु ।

**आपणिकः** - धन्यवादः । पुनः आगच्छतु ।

**श्लोकः-**

**तक्षकस्य विषं दन्ते मक्षिकायाः च मस्तके ।**
**वृश्चिकस्य विषं पृच्छे सर्वाङ्गे दुर्जनस्य तत् ।।**
**ताराणां भूषणं चन्द्रः नारीणां भूषणं पतिः ।**
**पृथिव्या भूषणं राजा विद्या सर्वस्य भूषणम् ।।**

# स्वाध्यायः

* एतस्य कोष्ठकस्य आधारेण वाक्यानि रचयन्तु ।

| | | |
|---|---|---|
| ईश्वरः<br>शिक्षिका<br>सुधाखण्डः<br>क्रीडाङ्गणम्<br>गृहम् | अत्र<br>तत्र<br>कुत्र<br>अन्यत्र<br>सर्वत्र | अस्ति |

१. --------------- ----------------- ------------------ ।
२. --------------- ----------------- ------------------ ।
३. --------------- ----------------- ------------------ ।
४. --------------- ----------------- ------------------ ।
५. --------------- ----------------- ------------------ ।

# स्वाध्यायः

* पुराणादिप्रसिद्धं सम्बन्धम् अवलम्ब्य वाक्यानि लिखन्तु ।

१. शिवः - गणेश -------- ---------------- ---------- ।
२. सीता - राम -------- ---------------- ---------- ।
३. कृष्णः - रुक्मिणी -------- ---------------- ---------- ।
४. लक्ष्मणः - सुमित्रा -------- ---------------- ---------- ।
५. दशरथः - राम -------- ---------------- ---------- ।
६. युधिष्ठिरः - नकुल -------- ---------------- ---------- ।
७. अर्जुनः - सुभद्रा -------- ---------------- ---------- ।
८. बलरामः - रोहिणी -------- ---------------- ---------- ।
९. रावणः - विभीषण -------- ---------------- ---------- ।
१०. लवः - कुश -------- ---------------- ---------- ।
११. कंसः - मन्दोदरी -------- ---------------- ---------- ।

# चतुर्थ सोपानम्

* लोटलकार (आज्ञार्थ) (अन्य. पु. ए. व ) ।
* संख्यास्मारणम् ।
* समयशिक्षणम् ।
  वादनम्
  सपाद
  सार्ध
  पादोन
  पञ्चोन / दशोन
  पञ्चाधिकम् / दशाधिकम् ।
* तः - पर्यन्तम् ।
* दिनचर्या

**पाठबिन्दुः**

**लोट्लकाररूपाणि**

**पाठ्योपकरणम् –** शिक्षकस्य अभिनयः एव ।

**पाठनक्रमः –**

**उपस्थापनम् –** शिक्षकः कञ्चित् छात्रम् उद्दिश्य प्रार्थनास्वरेण 'उत्तिष्ठतु' इति वदेत् । छात्रः उत्तिष्ठति । ततः 'गच्छतु' इति उक्त्वा तं गमयति । एवं क्रमेण उपस्थापनं करणीयम् ।

**अभ्यासः –** छात्रः शिक्षकम् उद्दिश्य – 'उत्तिष्ठतु, उपविशतु, गच्छतु, आगच्छतु, पठतु' – इत्यादिप्रार्थनाः कुर्युः । शिक्षकः तथा अभिनयं कुर्यात् ।

**संख्यापाठनम्**

**पाठबिन्दुः–** १, २, ३, ४, ५, ६, ७, ८, ९, १०, ११, १२

१०, २०, ३०, ४०, ५०, ६०, ७०, ८०, ९०, १००

**पाठ्योपकरणम् –** स्फोरकपत्राणि

**उपस्थापनम् –**

- अङ्गुलीनां द्वारा प्रदर्शनपूर्वकं पाठनम् ।
- लेखन्यः, सुधाखण्डाः– इत्यादिस्तूनां गणनापूर्वकं पाठनम् ।

**प्रयोगः –**

- छात्राः एव कक्ष्यायां विद्यामानानि वातायनानि, व्यजनानि, उत्पीठिकाः वा गणयित्वा कति सन्ति इति वदेयुः । यथा – १. षट् वातायनानि सन्ति । २. त्रीणि व्यनानि सन्ति ।

**अवधातव्याः अंशाः** – उपस्थापन – अभ्यासादि-समये वस्तूनि यदा प्रदर्श्यन्ते तदा न्यूनातिन्यूनं पञ्च, ततोऽधिकानि वा वस्तूनि भवेयुः । अन्यथा छात्राः द्वे त्रीणि लेखन्यः – इत्यादीनि अशुद्धानि वाक्यानि वदन्ति ।

**<u>समयशिक्षणम्</u>**

**पाठबिन्दुः - वादनम् – सपाद – सार्ध – पादोन – पञ्चोन – दशोन – पञ्चाधिक – दशाधिक**

**पाठ्योपकरणम् –** सूचीसहिता कृत्रिमघटी

**पाठनक्रमः**

**उपस्थापनम्**

- घटीं प्रदर्श्य पञ्चवादनम्, षड्वादनम् – इत्यादयः पाठनीयाः ।
- घटीं प्रदर्श्य सपादपञ्चवादनम्, सपादषड्वादनम्, सार्धपञ्चवादनम्, सार्धषड्वादनम्, पादोनपञ्चवादनम्, पादोनषड्वादनम्, पञ्चोनपञ्चवादनम्, दशाधिकषड्वादनम् – इत्यादयः शब्दाः पाठनीयाः ।

**अभ्यासः** – घट्याः साहाय्येन विविधान् समयान् प्रदर्श्य प्रश्नाः प्रष्टव्याः ।

**प्रयोगः** –

- अङ्कैः निर्दिष्टान् समयान् प्रदर्श्य शब्दैः वाचनीयम् ।
- यथा – ४.१५ – सपादचतुर्वादनम् ।
- ७.४५ – पादोन-अष्टवादनम् ।

**अवधातव्याः अंशाः**

- 'एकं, द्वे, त्रीणि, चत्वारि' इत्येते शब्दाः समयपाठनोपस्थापनार्थं न स्वीकरणीयाः । लिङ्गभेदकारणतः ते प्रमादहेतवः भवन्ति । अतः एव त्रिषु लिङ्गेषु यासां समानं रूपं ताः पञ्चादयः संख्याः एव स्वीकरणीयाः ।
- एकवादन-द्विवादन-त्रिवादन-चतुर्वादन-शब्दाः पार्थक्येन पाठनीयाः । अभ्यासः कारणीयः च ।
- घट्यां स्थिताः संख्याः दूरात् अभिज्ञातुं योग्याः स्युः ।

**विशेषः**

- वादनोत्तरशब्देन समयः निर्दिश्यते इति तु परम्परा । उदा – पञ्चवादनम् ।
- समयविषये प्रश्नः – 'कः समयः ?' इति वाक्येन ।
- 'कतिघण्टाः' 'कतिवादनम्' इत्यादयः न प्रयोक्तव्याः ।

# सम्भाषणम्

## ज्ञानाभ्यासः

**कवीशः** - आगच्छतु मित्र सुरेश ! स्वागतम् अस्ति । अहं भवतः एव प्रतीक्षां करोमि ।

**सुरेशः** - धन्यवादः मित्र ! सर्वे आगतवन्तः किम् ?

**कवीशः** - इदानीं पादोन पञ्चवादनं भवति । इतोऽपि पञ्चदशनिमेषाः सन्ति । तावत् वयं संख्याभ्यासं कुर्मः ।

**सुरेशः** - भवतु , प्रथमम् अहम् एकतः शतम् पर्यन्तं वदामि । भवान् श्रृणोतु । तदनन्तरं भवान् वदतु अहं श्रृणोमि ।

**कवीशः** - उत्तमः विचारः । तथास्तु किन्तु प्रथमं जलं पिबतु ।

**सुरेशः** - धन्यवादः ।

**सुरेशः** - एकं, द्वे , त्रीणि. चत्वारी ........................... शतम् । इदानीं भवान् वदतु ।

**कवीशः** - एकं, द्वे , त्रीणि. चत्वारी ........................... शतम् ।

**सुरेशः** - भवतः उच्चारणम् उत्तमम् अस्ति ।

**कवीशः** - आभारः , इदानीं भवान् श्लोकान् स्मरतु । अहम् अल्पाहारम् आनयामि ।

**सुरेशः** - मास्तु भ्रातः ! भवान् अपि पठतु । पश्चात् सर्वैः सिनेमागृहं गन्तव्यम् अस्ति ।

# स्वाध्यायः

*** वर्तमानकालतः आज्ञार्थं करोतु ।**

१. गच्छति - -----------------

२. पठति - ----------------

३. क्रीडति - -----------------

४. पिबति - -----------------

५. वदति - -----------------

६. लिखति - -----------------

७. पश्यति - -----------------

८. पृच्छति - -----------------

९. खादति - -----------------

१०. नयति - -----------------

११. त्यजति - -----------------

१२. करोति - -----------------

१३. श्रृणोति - -----------------

१४. प्रेषयति - -----------------

१५. स्मरति - --------------

# समयः

* समयम् अक्षरैः लिखन्तु ।

१. ७ : ०० ---------------------------- ।

२. ८ : ४५ ---------------------------- ।

३. ९ : १५ ---------------------------- ।

४. १० : ५० ---------------------------- ।

५. ११ : १० ---------------------------- ।

६. १२ : २५ ---------------------------- ।

७. १ : ३५ ---------------------------- ।

८. २ : २० ---------------------------- ।

९. ३ : ४० ---------------------------- ।

१०. ८ : ०० ---------------------------- ।

# तः / पर्यन्तम्

* भवान् प्रातः सप्तवादनतः रात्रौ नववादनपर्यन्तं किं किं करोति इति लिखतु ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

------------------------------------------ ।

# पञ्चमं सोपानम्

* सप्तमीविभक्तिः । [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]

* कदा ? ( अव्ययम् )

* अद्य - श्वः - परश्वः - प्रपरश्वः / अद्य - ह्यः - परह्यः - प्रपरह्यः

* दिनचर्या

## अधिकरणकारकम्

**पाठबिन्दुः – सप्तमीविभक्तिः**

**पाठनक्रमः –**

**उपस्थापनम् –** हस्तेन घटीं प्रदर्श्य 'घटी **हस्ते** अस्ति' इति वक्तव्यम् । 'घटी कुत्र अस्ति ?' इति प्रश्नः करणीयः । ततः घटीं कोषे स्थापयित्वा – 'घटी **कोषे** अस्ति' इति वक्तव्यम् । अनन्तरम् एतेन एव क्रमेण उत्पीठिकायां, लेखन्याम् – इत्यादीनि स्त्रीलिङ्गरूपाणि अपि उपस्थापनीयानि ।

**अभ्यासः –** ग्रन्थे, कोषे, विद्यालये, वृक्षे, पत्रिकायां, नद्यां, पुस्तके, नगरे – इत्यादिरूपाणां स्फोरकपत्रद्वारा अभ्यासः कारणीयः । शिक्षकः प्रश्नोत्तरद्वारा पाठयेत् । यथा – विश्वनाथमन्दिरं कुत्र अस्ति ? ताज्महाल कुत्र अस्ति ? इत्यादिप्रश्नाः । सप्तम्याः उत्तरं वक्तुम् उचिताः प्रश्नाः प्रष्टव्याः । चेन्नै इत्यादिषु शब्देषु तेन सह 'नगरे' इत्यादियोजनस्य उपायाः प्रदर्शनीयाः । यथा – चेन्नैनगरे, भिलैनगरे...

**प्रयोगः–** छात्राः परस्परं गृहं, कार्यालयः, विद्यालयः – इत्यादिविषये प्रश्नं पृष्ट्वा उत्तरं प्राप्नुयुः ।

यथा – १. भवतः कार्यालयः कुत्र अस्ति ?

२. मम कार्यालयः वसन्तविहारे अस्ति ?

**अवधातव्यः अंशः –** शिक्षकः विभक्तिरूपाणि स्पष्टतया उच्चारयेत् । लिङ्गभेदं च स्वराघातेन स्पष्टतया ज्ञापयेत् ।

**विशेषः –** आग्रा, अमेरिका, गोवा – इत्यादिशब्दान् आकारान्तस्त्रीलिङ्गान् मत्वा आग्रायाम्, अमेरिकायां, गोवायाम् – इति सप्तमीरूपाणि पाठयितुं शक्यन्ते ।

**पाठबिन्दुः – कदा ?**

**पाठनक्रमः –**

**उपस्थापनम् –** कृषिकः प्रातःकाले क्षेत्रं गच्छति । (द्विवारम् वक्तव्यम्) ततः 'कृषिकः कदा क्षेत्रं गच्छति ?' इति कञ्चित् छात्रम् उद्दिश्य प्रश्न करणीयः । एवम् अन्यान्यवाक्यानि उक्त्वा तन्नाम आरम्भे उत्तरम् उक्त्वा ततः प्रश्नकरणेन 'कदा' इत्यस्य उपस्थापनं करणीयम् । अनन्तरं विभिन्नानि वाक्यानि उक्त्वा तद्विषये प्रश्नाः करणीयाः ।

**अभ्यासः –** एतावत्पर्यन्तं शिक्षकः एव उत्तरम् उक्त्वा प्रश्नमपि पृच्छति स्म । अधुना शिक्षकः उत्तरं वदति, छात्रः प्रश्नं पृच्छति ।

यथा – शिक्षकः – बालकः सायङ्काले क्रीडति ।

छात्राः – बालकः कदा क्रीडति ?

तदनन्तरं शिक्षकः एकैकं छात्रं कदा इति उपयुज्य प्रश्नं पृच्छति । तदा छात्रः स्वतन्त्रतया वाक्यं वदति ।

यथा – शिक्षकः – १. भवान् कदा देवं नमति ?

छात्रः – अहं प्रातःकाले देवं नमामि ।

शिक्षकः २. भवती कदा पठति ?

छात्रा – अहम् सप्तवादने पठामि ।

**प्रयोगः** – इदानीं छात्राः शिक्षकम् उद्दिश्य तस्य दिनचर्याविषये प्रश्नान् पृच्छन्ति । शिक्षकः उत्तरं वदति ।

यथा – १. छात्रः – भवान् कदा उत्तिष्ठति ?

शिक्षकः – अहं पञ्चवादने उत्तिष्ठामि ।

छात्राः –२. भवान् कदा अल्पाहारं स्वीकरोति ?

शिक्षकः – अहम् अष्टवादने अल्पाहारं स्वीकरोमि ।

**<u>पाठबिन्दुः</u> अद्य, श्वः, परश्वः, प्रपरश्वः, ह्यः, परह्यः, प्रपरह्यः**

**पाठ्योपकरणानि** – अद्य भानुवासारः – इत्येवं क्रमेण लिखितानि फलकानि । दिनदर्शिका ।

**पाठनक्रमः** –

**उपस्थापनम्** – तस्मिन् दिने कः वासरः इति ज्ञात्वा शिक्षकः 'अद्य अमुकवासरः' इति द्विवारं वदेत् ।

यथा – अद्य शनिवासरः । श्वः भानुवासरः ।

शनि–भानुवासरयोः पौर्वापर्य जानन्तः छात्राः तयोः शब्दयोः अर्थम् अवगच्छन्ति । तदनन्तरम् 'अद्य कः वासरः ? श्वः कः वासरः ?' इति छात्रान् उद्दिश्य प्रश्न करणीयः । 'परश्वः परह्यः' – इत्यादीनाम् अपि एतेन एव क्रमेण उपस्थापनं करणीयम् ।

**अभ्यासः**– शिक्षकः अभिनयद्वारा 'अद्य, श्वः' – इति एकैकं वदति । छात्राः अपि अभिनयं कुर्वन्तः वदन्ति । अनन्तरं शिक्षकः एकैकं छात्रम् उद्दिश्य 'अद्य गुरुवासरः । गुरुवासरः कदा ?' इति पृच्छति । अनन्तरम् उत्तरम् अनुक्त्वा प्रश्नं पृच्छति । 'परह्यः कः वासरः ? प्रपरश्वः कः वासरः ?' इति । छात्राः उत्तरं वदन्ति ।

**प्रयोगः**– वासरं परिवर्त्य तद्दिनं भानुवासरं मत्वा 'अद्य भानुवासरः' इति लिखितं फलकं शिक्षकः दर्शयति । तद् दृष्ट्वा छात्राः 'श्वः सोमवासरः, ह्यः शनिवासरः' – इत्यादीनि वाक्यानि वदन्ति ।

**अवधातव्याः अंशाः** – ह्यः, श्वः, परह्यः, परश्वः – इत्यादीनाम् उच्चारणं विशेषयता पाठनीयं भवति । 'अद्यः कः वासरः ?' इति अध्यापकेन यदा प्रश्नः क्रियते तदा छात्राः 'सोमवासरः' इत्येतावन्मात्रं वदेयुः । वस्तुतस्तु पाठनबिन्दवः 'अद्य श्वः' इत्यादयः खलु ? अतः छात्राः तान् अपि यथा अवश्यम् उच्चारयेयुः तथा अवधानं दातव्यम् ।

**पाठबिन्दुः दिनचर्या**

**पाठनक्रमः**

**उपस्थापनम्** – शिक्षकः 'अहं प्रातःकाले पञ्चवादने उत्तिष्ठामि' इति स्वस्य दिनचर्याः विवरणस्य आरम्भं कुर्यात्।

'अनन्तरं दन्तधावनं करोमि। योगासनं करोमि।' – एवं रीत्या स्वेन दिने क्रियमाणानि कार्याणि वक्तव्यानि।

**अभ्यासः**– छात्राः अपि स्वस्य दिनचर्या वदेयुः।

**प्रयोगः**– कः कदा उत्तिष्ठति, किं करोति – इति छात्राः परस्परं प्रश्नोत्तरं कुर्युः।

## सम्भाषणम्

विद्या - सुप्रभातम् आचार्य ! अद्य भवान् किं पाठयति ?
आचार्यः - अद्य वयं प्रश्नोत्तरक्रीडां क्रीडामः ।
छात्राः : धन्यवादः आचार्य !
आचार्यः - रक्षे ! जलं कुत्र अस्ति ?
रक्षा - जलं घटे अस्ति ।
आचार्यः - शोभनम् । आदित्य ! घटः कुत्र अस्ति ?
आदित्यः - आचार्य ! घटः गृहे अस्ति ।
आचार्यः - श्रवण ! गृहं कुत्र अस्ति ?
श्रवणः - गृहं नगर्याम् अस्ति ।
आचार्यः - नगरी कुत्र अस्ति ईशान ?
ईशानः - नगरी राज्ये अस्ति ।
आचार्यः - राज्यं कुत्र अस्ति शैली ?
शैली - राज्यं देशे अस्ति ।
आचार्यः - आकाङ्क्षे ! देशः कुत्र अस्ति ?
आकाङ्क्षा - देशः पृथिव्याम् अस्ति ।
आचार्यः - प्रीतेश ! पृथ्वी कुत्र अस्ति ?
प्रीतेशः - आचार्य ! पृथ्वी जले अस्ति ।
आचार्यः - जननी कुत्र पाकं पचति हर्ष ?
हर्षः - जननी पाकशालायां पाकं पचति ।
आचार्यः - यमुना कुत्र प्रवहति राकेश ?
राकेशः - यमुना मथुरायां प्रवहति ।
आचार्यः - यूयं कुत्र पठथ ?
छात्राः - वयं कक्षायां पठामः ।
आचार्यः - इदानीं श्लोकं गायामः ।

**उत्सवे व्यासने प्राप्ते दुर्भिक्षे शत्रुसंकटे ।**
**राजद्वारे स्मशाने च यस्तिष्ठति स बान्धवः ।।**

# सप्तमी विभक्ति

## * कुत्र किम् अस्ति इति लिखन्तु ।

१. विश्वनाथमन्दिरम् - काशी ---------------------------------------------- ।
२. ताजमहालयः - आग्रा ---------------------------------------------- ।
३. कुतुबमिनार - देहली ---------------------------------------------- ।
४. राममन्दिरम् - अयोध्या ---------------------------------------------- ।
५. स्वामिविवेकानन्दस्मारकम् - कन्याकुमारी

---------------------------------------------------------------------------- ।

६. सोमनाथमन्दिरम् - सोराष्ट्र ---------------------------------------------- ।
७. सीदिसैयदजालिका - अहमदाबाद ---------------------------------------------- ।
८. तापीतीरम् - सुरतम् ---------------------------------------------- ।
९. गंगातीरम् - ह्रषीकेश ---------------------------------------------- ।
१०. अक्षरधाम - गान्धीनगरम् ---------------------------------------------- ।

## * यथोचितानि वाक्यानि रचयन्तु ।

**देशः राज्यम् मण्डलम् ग्रामः मन्दिरम् भक्तः**

**उदा.** देशे राज्यम् अस्ति ।

१. ------------------------------------ ।
२. ------------------------------------ ।
३. ------------------------------------ ।
४. ------------------------------------ ।
५. ------------------------------------ ।

## * वाक्याभ्यासं करोतु ।

१. अद्य कः वासरः ? ---------------------------------- ।
२. श्वः कः वासरः ? ---------------------------------- ।
३. परश्वः कः वासरः ? ---------------------------------- ।
४. प्रपरश्वः कः वासरः ? ---------------------------------- ।
५. ह्यः कः वासरः ? ---------------------------------- ।
६. परह्यः कः वासरः ? ---------------------------------- ।
७. प्रपरह्यः कः वासरः ? ---------------------------------- ।

# षष्ठं सोपानम्

* द्वितीयाविभक्तिः । [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]

* प्रार्थनावाक्यप्रकारः ।

कृपया .............ददातु । कृपया .............पठतु । कृपया.............खादतु ।

**पाठबिन्दुः - द्वितीयाविभक्तिः**

**पाठ्योपकरणानि** - स्त्री-पुं-नपुंससकलिङ्गशब्दवाच्यानि वस्तूनि ।

यथा - दन्तकूर्चः, स्नानफेनकम्, अग्निपेटिका, मापिका, पुनःपूरणी, अङ्कनी, फेनकम्, करवस्त्रम् इत्यादीनि ।

**पाठनक्रमः-**

**उपस्थापनम्** - उत्पीठिकायां बहूनि वस्तूनि स्थापितानि भवेयुः । शिक्षकः ततः एकैकमपि वस्तु साभिनयं स्वीकुर्वन् उच्चैः 'अहं दन्तकूर्चं स्वीकरोमि । अहं दर्पणं स्वीकरोमि' इति वदन् उपस्थापनं कुर्यात् । क्रमशः आदौ पुंल्लिङ्गशब्दानां, ततः नपुंसकलिङ्गशब्दानां, ततः स्त्रीलिङ्गानां च पाठनं कुर्यात् ।

(स्वीकृतानि वस्तूनि उत्पीठिकायां यथास्थानं स्थापयन् 'अहं दन्तकूर्चं स्थापयामि, दर्पणं स्थापयामि' इति वदन् उपस्थापितस्य दृढिकरणं कर्तुं शक्यते ।)

**अभ्यासः-**

१. स्फोरकपत्रद्वारा - स्फोरकपत्रे शब्दानां प्रथमाविभक्त्यन्तं रूपं लिखितं भवति । छात्राः तद् दृष्ट्वा द्वितीयाविभक्त्यन्तं रूपं वदेयुः ।

यथा - स्फोरकपत्रे — विद्यालयः

छात्राः - विद्यालयम्

२. रमेशः ............. खादति ।

लता .............. गच्छति ।

इत्यादिवाक्यं दर्शनीयम् । छात्राः तत्र उचितं कमपि शब्दं योजयित्वा समग्रं वाक्यं पुनः वदेयुः ।

यथा - फलम्, रोटिकां, दाडिमं, विद्यालयं, वित्तकोषं, काशीम् । ....

**प्रयोगः-**

१. भवान् किं पठति ? किं लिखति ? किं करोति ? - इत्यादिप्रश्नानाम् उत्तररूपेण छात्राः बहूनि वाक्यानि वदेयुः ।

२) छात्राः किं किं खादन्ति, किं किं कुर्वन्ति - इत्यादिकं वदेयुः ।

यथा - १. अहं रोटिकां खादामि ।

२. अहम् अभ्यासं करोमि ।

**अवधातव्याः अंशाः-**

- छात्राणाम् उच्चारणसमये अवधानं भवेत्। अन्यथा ते प्रथमाविभक्तिरूपमेव वदन्तः भवन्ति।
- पाठ्यमानानां शब्दानां द्वितीयैकवचनरूपे अन्ते 'अम्' इति श्रूयते। अतः शिक्षकः स्वराघातपूर्वकं तद् रूपं पाठयेत्।

**विशेषः** - द्वितीयाविभक्तेः एकवचनरूपमेव पाठ्यते। आरम्भस्तरे बहुवचनरूपस्य पाठनं न क्रियते।

**<u>पाठबिन्दुः</u> - कृपया ............ ददातु।**

**पाठ्योपकरणानि** - नित्योपयोगीनि वस्तूनि।

**पाठनक्रमः**

**उपस्थापनम्** - शिक्षकः कस्यचित् छात्रस्य पुरतः गत्वा हस्तौ प्रसार्य 'कृपया पुस्तकं ददातु' इति वदेत। पुनः अपरं 'कृपया अङ्कनीं ददातु' इति वदेत्। एवं पुनः पुनः वदन् 'कृपया ददातु' इत्यस्य उपस्थापनं कुर्यात्।

**अभ्यासः** - शिक्षकः उत्पीठिकायाः उपरि स्थापितेषु वस्तुषु एकैकं वस्तु उन्नीय दर्शयति। शिक्षकः यद् वस्तु दर्शयति तद् 'कृपया ददातु' इति उच्चैः वदेयुः छात्राः।

यथा - शिक्षकः घटीं दर्शयति। छात्राः - कृपया घटीं ददातु।

शिक्षकः मापिकां दर्शयति। छात्राः - कृपया मापिकां ददातु।

**प्रयोगः** - छात्राः एव शिक्षकं स्वयम् एकैकं वस्तु याचन्ति। पूर्वं शिक्षकः येषां वस्तूनि स्वीकृतवान् भवति, ते छात्राः इदानीं शिक्षकं सम्प्रार्थ्य स्ववस्तु प्राप्नुयुः।

यथा - 'कृपया लेखनीं ददातु' - इति छात्रः वदेत्। तदा एव शिक्षकः लेखनीं दद्यात्।

**अवधातव्यः अंशः** - अभ्यासाभावात् छात्राः 'कृपया लेखनी ददातु। इत्यादिरूपेण प्रथमारूपमेव वदन्ति। शिक्षकः जागरूकतया द्वितीयान्तमेव उक्त्वा शुद्धरूपं वाचयेत्।

**विशेषः**- 'कृपया.......... ददातु' - इति पाठ्यांशे अपि यद्यपि पाठबिन्दुः द्वितीयाविभक्तिः एव, तथापि 'कृपया............ ददातु' इत्येषा वाक्यरचना नित्यव्यवहारेऽपि अत्यन्तम् उपयोगिनी इत्यतः सा अत्र पृथक्पाठबिन्दुरूपेण दत्ता अस्ति।

# सम्भाषणम्

**जननी** - वीणे ! भवती किं करोति ?
**वीणा** - अहं विज्ञानं पठामि ।
**जननी** - अनुजः किं करोति ?
**वीणा** - सः शयनं करोति ।
**जननी** - जनकः किं करोति ?
**वीणा** - जनकः समाचारपत्रं पठति ।
**जननी** - भवती दुग्धं आनयति किम् ?
**वीणा** - अम्ब ! अहम् उत्तरं स्मरामि । अनुजं कथयतु ।
**जननी** - वत्से ! सः रुग्णः अस्ति । अतः एव सः शयनं करोति ।
**वीणा** - अस्तु, अहं गच्छामि । धनं स्युतं ददातु भोः ।
**जननी** - स्वीकरोतु । किलोपरिमितं नवनीतम् अपि आनयतु ।
**वीणा** - अस्तु , अम्ब अहं चाकलेहम् अपि आनयामि ?
**जननी** - अतः एव भवती गन्तुम् इच्छति । अस्तु , चाकलेहं अपि आनयतु ।

# आज्ञार्थवाक्यानि

* **अधोनिर्दिष्टं रिक्तस्थानं पुरयतु ।**

१. कृपया .............ददातु ।
२. कृपया .............वदतु ।
३. कृपया .............खादतु ।
४. कृपया .............लिखतु ।
५. कृपया .............क्षालयतु ।
६. कृपया .............पृच्छतु ।

# वाक्याभ्यासः

१. अहं ......... भजामि। (ईश्वर)
२. रुबिनः ...... प्राक्षालयत्।(वस्त्र )
३. राजः ....... नमति।(जननी)
४. आनंदः ....... करोति। (कार्य)
५. अवनी ....... पृच्छति। (माया)
६. आरक्षकः ...... दण्डयति। (चोर )
७. वयं ......... पश्यामः। (लता)
८. वानराः ........ आरोहति (वृक्ष )
९. छात्राः ........ अगच्छन्। (नगर)
१०. वायुः ....... स्पृशति। (मानव )

# सप्तमं सोपानम्

* पुरतः - पृष्ठतः , वामतः - दक्षिणतः , उपरि - अधः ( षष्ठी विभक्ति सहितम् )

* **अपादानकारकम् ।**

इतः - ततः - कुतः ?

* **अव्ययानि ।**

शीघ्रम् - मन्दम्
उच्चैः - शनैः
किमर्थम्
अपि
च
अतः

* **तसिल् प्रत्ययः ( तः )**

**पाठबिन्दुः – पुरतः × पृष्ठतः, वामतः × दक्षिणतः, उपरि × अधः**

**पाठ्योपकरणानि** – करदीपः, आसन्दः, उत्पीठिका, पुस्तकम् – इत्यादीनि वस्तूनि चित्राणि च ।

**पाठनक्रमः –**

**उपस्थापनम्**

- शिक्षकः स्वस्य पुरतः आसन्दं, पृष्ठतः उत्पीठिकां च स्थापयित्वा तयोः प्रदर्शनपूर्वकं 'आसन्दः मम पुरतः अस्ति । उत्पीठिका मम पृष्ठतः अस्ति' इति कथनेन तयोः शब्दयोः उपस्थापनं कुर्यात् ।
- एवमेव वामतः दक्षिणतः च दृश्यमानं वस्तु दर्शयन् तयोः उपस्थापनं कुर्यात् ।
- आकाशं भूमिं च दर्शयन् उपरि अधः इत्यनयोः उपस्थापनं कुर्यात् ।

**अभ्यासः– १**




एतेन क्रमेण पञ्च छात्राः स्थापनीयाः । ततः कः कुत्र इति अस्ति इति छात्राः वदेयुः ।

यथा – आनन्दः राजेशस्य पुरतः अस्ति ।

मनोजः राजेशस्य पृष्ठतः अस्ति ।

**प्रयोगः** – छात्राः स्वनगरस्य प्रसिद्धभवनादीनि स्मृत्वा 'पुरतः' इत्यादीनाम् उपयोगं कृत्वा वाक्यानि वदेयुः ।

यथा – (बेङ्गलूरुनगरे) विधानसौधस्य पुरतः न्यायालयः अस्ति ।

पृष्ठतः शाशकभवनम् अस्ति ।

**अवधातव्याः अंशाः** – शिक्षकस्य अभिनयः स्पष्टः भवेत् ।

यदा शिक्षकः छात्राणाम् अभिमुखं तिष्ठति तदा तस्य वामभागः छात्राणां दक्षिणः, तस्य दक्षिणभागः छात्राणां वामश्च भवति । एतस्मात् छात्राणां भ्रमः भवति । प्रयत्नेन स च परिहरणीयः ।

**<u>पाठबिन्दुः</u> - इतः, ततः, कुतः ?**

**पाठ्योपकरणानि** — स्फोरकपत्राणि, फलकं च ।

**पाठनक्रमः**

**उपस्थापनम्** – कश्चन छात्रः समीपम् आह्वातव्यः । ततः 'भवान् इतः तत्र गच्छतु' इति निर्देष्टव्यम् । तत्र यदा गच्छति तदा 'ततः अत्र आगच्छतु' इति कथनीयम् । एवम् इतः ततः – इत्यनयोः उपस्थापनं करणीयम् । गृहीतं सुधाखण्डं पातयन् 'सुधाखण्डः हस्ततः पतति' इति उक्त्वा 'सुधाखण्डः कुतः पतति ?' इति प्रश्नकरणेन कुतः इत्सस्य उपस्थापनं करणीयम् ।

**अभ्यासः** –

१. स्फोरकपत्रद्वारा – स्फोरकपत्रे प्रथमान्तः शब्दः लिखितः भवति । छात्राः प्रातिपदिकस्य अन्ते 'तः' इति योजयित्वा वदेयुः ।

यथा – स्फोरकपत्रे – आपणः

२. फलके लिखितान् शब्दान् दृष्ट्वा छात्राः वाक्यानि वदेयुः ।

यथा – गृहम् ⟶ विद्यालयः ⟶ उद्यानम् ⟶ गृहम्

छात्राः – सः गृहतः विद्यालयं गच्छति ।

विद्यालयतः उद्यानं गच्छति । ............।

**प्रयोगः** - छात्राः विद्यालयतः प्रस्थानानन्तरं रात्रौ गृहप्राप्तिपर्यन्तं कुत्र कुत्र गच्छन्ति इति विचिन्त्य वदेयुः।

**यथा** – अहं विद्यालयतः ग्रन्थालयं गच्छामि । ग्रन्थालयतः ............... ।

**अवधातव्याः अंशाः** – 'त' इत्यस्य योजनं प्रातिपदिकात् परं करणीयम्, न तु प्रथमान्तरूपात् । परन्तु छायाः नपुंसकलिङ्गशब्देषु अज्ञानात् अनवधानात् वा प्रथमान्तादेव कृत्वा 'नगरंतः, हरिद्वारंतः' – इत्यादीनि अशुद्धानि रूपाणि वदन्ति । तादृशानि परिहर्तव्यानि । शुद्धरूपाणि बोधनीयानि ।

**विशेषः**:- आकारान्तानाम् ईकारान्तानां च स्त्रीलिङ्गशब्दानां पञ्चमीविभक्तौ षष्ठीविभक्तौ च रूपाणि समानानि भवन्ति ।

यथा – मथुरा – मथुरायाः (पञ्चमी), मथुरायाः (षष्ठी)

नदी — नद्याः (पञ्चमी), नद्याः (षष्ठी)

तयोः रूपयोः अर्थभेदं ज्ञातुं कदाचित् कष्टं भवेत् । पञ्चम्यर्थे तसन्तस्य प्रयोगेण सः क्लेशः परिहृतः भवति ।

यथा – मथुरा – मथुरातः (पञ्चमी), मथुरायाः (षष्ठी)

नदी — नदीतः (पञ्चमी), नद्याः (षष्ठी)

**पाठबिन्दुः - शीघ्रम् × मन्दम्**

**पाठ्योपकरणानि** – अश्व–शश–कूर्मादीनां चित्राणि ।

**पाठनक्रमः-**

**उपस्थापनम्** – शिक्षकः कक्ष्यायां स्वयमेव शीघ्रं मन्दं च चलन् 'अहं शीघ्रं गच्छामि', 'अहं मन्दं गच्छामि' इति वदन् तयोः उपस्थापनं कुर्यात् ।

**अभ्यासः-**

१. मृगेषु कः शीघ्रं गच्छति, कः मन्दं गच्छति इति छात्राणां मुखात् वाचनीयम् । (चित्रं दर्शयित्वा मृगस्य नाम शिक्षकः वदेत् । छात्राः पूर्णं वाक्यं वदेयुः ।

यथा – १. शिक्षकः शशस्य चित्रं दर्शयति ।

छात्राः – शशः शीघ्रं गच्छति ।

२. शिक्षकः कूर्मस्य चित्रं दर्शयति ।

छात्राः – कूर्मः मन्दं गच्छति ।

२. वाहनानां चित्रप्रदर्शनेन अपि अभ्यासः कारणीयः ।

यथा – १. शिक्षकः वृषभशकटस्य चित्रं दर्शयति ।

छात्राः – शकटः मन्दं गच्छति ।

२. शिक्षकः विमानस्य चित्रं दर्शयति ।

छात्राः – विमानं शीघ्रं गच्छति ।

**प्रयोगः-** छात्राः – केन प्रकारेण कार्याणि कुर्वन्ति इति वदेयुः ।

यथा – अहं शीघ्रं कार्यं करोमि । मन्दं भोजनं करोमि ।

**अवधातव्यः अंशः** – शीघ्रम् इत्यस्य विरुद्धार्थरूपेण 'शनैः' इत्यस्य प्रयोगः अपि अस्ति ।

**विशेषः** – अस्माभिस्तु तत् उच्चैः इत्यस्य विरुद्धार्थकत्वेन पाठ्यते ।

**पाठबिन्दुः – उच्चैः × शनैः**

**पाठ्योपकरणम्** – शिक्षकस्य वाचिकाभिनयः एव ।

**पाठनक्रमः-**

**उपस्थापनम्** – कस्यचित् छात्रस्य मुखात् किमपि एकं वाक्यं वाचनीयम् । प्रायः सः शनैः वदति । तदा स्वयम् एकं वाक्यम् उच्चैः वक्तव्यं शिक्षकेण । अनन्तरं 'सः शनैः वदति । अहम् उच्चैः वदामि' इति कथनेन अनयोः उपस्थापनं करणीयम् ।

**अभ्यासः-** गायति, पठति, शब्दं करोति – इत्यादीनि उपयुज्य छात्राः तत्पूर्वम् उच्चैः इति शनैः इति वा योजयित्वा बहूनि वाक्यानि वदेयुः ।

यथा– १. नीरजा शनैः गायति ।

२. दिलीपः उच्चैः पठति ।

**प्रयोगः-** छात्राः स्वीयेषु वाक्येषु तयोः प्रयोगं कुर्युः ।

**अवधातव्यः अंशः**– उच्चैः इति लिखित्वा दर्शनमपि वरम् । अन्यथा तद्विषये छात्राः दोषं कुर्वन्ति ।

**वशेषः** – शनैः इत्यर्थे नीचै : इत्यपि केचन प्रयोगं कुर्वन्ति । तदपि भवितुम् अर्हति । अस्माभिस्तु शनैः इत्येव पाठ्यते ।

**पाठबिन्दुः - किमर्थम् ?**

**पाठ्योपकरणानि** – शिक्षकस्य वाक्यानि एव ।

**पाठनक्रमः –**

**उपस्थापनम्** – उत्तरवाक्यकथनान्तरं प्रश्नकरणेन उपस्थापनं करणीयम् ।

यथा – १. सः आरोग्यार्थं योगासनं करोति ।

सः किमर्थं योगासनं करोति ?

२. एषा ज्ञानार्थं पठति ।

एषा किमर्थं पठति ?

**अभ्यासः**– उत्तरवाक्यानि श्रुत्वा छात्राः प्रश्नं पृच्छेयुः ।

यथा – शिक्षकः – विनोदः क्रीडार्थं क्रीडाङ्गणं गच्छति ।

छात्राः – विनोदः किमर्थं क्रीडाङ्गणं गच्छति ?

**प्रयोगः** – छात्राः 'किमर्थम् ?' – इति उपयुज्य शिक्षकम् उद्दिश्य बहून् प्रश्नान् पृच्छेयुः । शिक्षकः तेषाम् उत्तरं वदेत् ।

यथा – छात्रः – भवान् किमर्थं संस्कृतं पाठयति ?

शिक्षकः – अहं सन्तोषार्थं संस्कृतं पाठयामि ।

**अवधातव्यः अंशः** – किमर्थम् इत्यस्य उत्तररूपेण छात्राः बहून् शब्दान् वक्तुं न शक्नुवन्ति । अतः शिक्षकः आनन्दार्थं, ज्ञानार्थं, बुभुक्षानिवारणार्थम् इत्यादीन् शब्दान् सूचयेत् ।

**पाठबिन्दुः - अपि**

**पाठ्योपकरणम्** - लेखनी, अङ्कनी, मापिका इत्यादिनि नित्योपयोगीनि वस्तूनि ।

**पाठनक्रमः -**

**उपस्थापनम्** - १. शिक्षकः कञ्चित् छात्रम् उत्थापयति, वदति – 'गोविन्दः उत्तिष्ठति ।' तत्पश्चात् अन्यमपि उत्थाय 'मुकुन्दः अपि उत्तिष्ठति' – इति वदति ।

२. शिक्षकः कञ्चित् छात्रं बहिः प्रेषयित्वा वदति – 'सुरेशः गच्छति ।' तत्पश्चात् स्वयमपि गच्छन् वदति – 'अहमपि गच्छामि ।'

**अभ्यासः**- १. शिक्षकः वाक्यद्वयं वदति । छात्राः 'अपि' योजयित्वा वदन्ति ।

यथा – शिक्षकः – रामः गीतं गायति । नृत्यं करोति ।

छात्राः– रामं गीतं गायति । नृत्यम् अपि करोति ।

शिक्षकः – सः रामायणं पठति । महाभारतं पठति ।

छात्राः– सः रामायणं पठति । महाभारतम् अपि पठति ।

२. शिक्षकः वाक्यं वदति । छात्राः 'अपि' योजयित्वा वदन्ति ।

यथा – शिक्षकः – अहं गच्छामि ।

छात्राः – अहम् अपि गच्छामि ।

शिक्षकः – अहं हसामि ।

छात्राः– अहमपि हसामि ।

**पाठबिन्दुः - च**

**पाठ्योपकरणम्** – नित्योपयोगीनि बहूनि वस्तूनि।

**पाठ्यक्रमः-**

**उपस्थापनम्** –

१. 'अहं सुधाखण्डं, लेखनीं, पुस्तकं च स्वीकरोमि' इति वदन् शिक्षकः तानि वस्तूनि स्वीकुर्वन् उपस्थानं कुर्यात्।

२. 'अहं पत्रिकाम्, अङ्कनीं, चाकलेहं च ददामि' – इति वदन् तानि कस्मैचित् छात्राय दद्यात्।

**अभ्यासः -**

शिक्षकः त्रीन् शब्दान् वदेत्। छात्राः तेषाम् अन्ते 'च' योजयित्वा वाक्यं वदेयुः।

यथा – शिक्षकः – संस्कृतम् — गणितम् — विज्ञानम्।

छात्राः – अहं संस्कृतं गणितं विज्ञानं च पठामि।

**प्रयोगः** – छात्राः 'च' सहितानि वाक्यानि स्वयं वदेयुः।

**पाठबिन्दुः - अतः**

**पाठ्योपकरणानि** — नित्योपगीनि वस्तूनि।

**पाठनक्रमः-**

**उपस्थापनम् :-**

१. शिक्षकः श्रान्तिं, पिपासानुभवं च अभिनयेन दर्शयति। ततः वदति – पिपासा भवति। अतः जलं पिबामि।

२.त्वराम् अभिनीय वदति – विलम्बः भवति। अतः अहं गच्छामि। एवं क्रमेण उपस्थानम्

**अभ्यासः-** शिक्षकः वाक्यद्वयं वदति। छात्राः 'अतः' संयोज्य वदन्ति।

यथा – शिक्षकः – १. सः शान्तिम् इच्छति। ध्यानं करोति।

छात्राः – सः शान्तिम् इच्छति, अतः ध्यानं करोति।

शिक्षकः – २. बुभुक्षा भवति। भोजनं करोमि।

छात्राः – बुभुक्षा भवति। अतः भोजनं करोमि।

शिक्षकः ३. अस्वास्थ्यम् अस्ति, कार्यालयं न गच्छामि।

छात्राः अस्वास्थ्यम् अस्ति, अतः कार्यालयं न गच्छामि।

**प्रयोगः-** शिक्षकः अर्धवाक्यं वदति। छात्राः तदपि उच्चार्य वाक्यस्य उत्तरार्धं नानाप्रकारैः वदेयुः।

यथा – शिक्षकः – अद्य वृष्टिः भवति।

१. छात्रः – अद्य वृष्टिः भवति। अतः अहं बहिः न गच्छामि।

२. छात्रः – अद्य वृष्टिः भवति। अतः छत्रं नयामि।

# सम्भाषणम्

वेङ्कटेशः - समीर ! भवतः विद्यालयस्य नाम किम् ?
समीरः - मम विद्यालयस्य नाम लोटस् अस्ति ।
वेङ्कटेशः - मम विद्यालयस्य नाम एकलव्य अस्ति । मम विद्यालयः मह्यं बहु रोचते ।
समीरः - भवतः विद्यालये कति भवनानि सन्ति ?
वेङ्कटेशः - मम विद्यालये षड् भवनानि सन्ति । तेषु अहं मध्यमे भवने पठामि । तस्य पुरतः विशालं क्रीडाङ्गणम् अस्ति ।
समीरः - मम विद्यालये अपि लघुक्रीडाङ्गणम् अस्ति ।
वेङ्कटेशः - मम विद्यालयस्य पृष्ठतः क्षेत्रम् अपि अस्ति । वामतः उद्यानम् एवं दक्षिणतः मार्गः अस्ति ।
समीरः - उपरि च अधः किम् अस्ति ?
वेङ्कटेशः - उपरि कक्षा अधः च कक्षा अस्ति ।
समीरः - अस्तु वेङ्कटेश ! पुनर्मिलामः । इतोऽपि गृहकार्यम् अवशिष्टम् अस्ति ।
वेङ्कटेशः - अस्तु , पुनर्मिलामः ।

# वाक्याभ्यासः

* **पुरतः - पृष्ठतः , वामतः - दक्षिणतः , उपरि - अधः एतेषाम् उचितम् उपयोगं करोतु ।**

१. ------------------------------------------------------- ।
२. ------------------------------------------------------- ।
३. ------------------------------------------------------- ।
४. ------------------------------------------------------- ।
५. ------------------------------------------------------- ।
६. ------------------------------------------------------- ।

# वाक्याभ्यासः

* युवकः कुतः कुत्र गच्छति इति लिखन्तु ।

गृहतः > विद्यालयः > ग्रन्थालयः > पत्रालयः > वित्तकोषः > उपहारगृहम् > वाटिका > आपणः > मन्दिरम् > मित्रगृहम् > न्यायालयः > उद्यानम् > गृहम्

१. ............................................................... ।
२. ............................................................... ।
३. ............................................................... ।
४. ............................................................... ।
५. ............................................................... ।
६. ............................................................... ।
७. ............................................................... ।
८. ............................................................... ।
९. ............................................................... ।
१०. ............................................................... ।
११. ............................................................... ।
१२. ............................................................... ।

* एतेषु कः शीघ्रं गच्छति कः मन्दं गच्छति इति लिखन्तु ।

१. शशकः - ------------------- ।
२. सिंहः - ------------------- ।
२. मुषकः - ------------------- ।
२ गजः - ------------------- ।
५. सर्पः - ------------------- ।
६. अजः - ------------------- ।

* एतेषु कः उच्चैः वदति कः नीचैः वदति इति लिखन्तु ।

१. शिक्षकः - ------------------- ।
२. छात्रः - ------------------- ।
३. सिंहः- ------------------- ।
४. बिडालः- ------------------- ।
५. पिपीलिका - ------------------- ।
६. मयुरः- ------------------- ।

## * अपि इति उपयुज्य वाक्यानि रचयन्तु ।

१. अहं संस्कृतं पठामि । विज्ञानं पठामि ।
-------------------------------------------------- ।

२. छात्रः श्लोकं लिखति । प्रयोगं करोति ।
-------------------------------------------------- ।

३. बालकः शाकं खादति । रोटिकां खादति ।
-------------------------------------------------- ।

४. माता पाकं करोति । परिवेषणं करोति ।
-------------------------------------------------- ।

५. भगिनी वस्त्रं क्षालयति । पात्रं क्षालयति ।
-------------------------------------------------- ।

६. शिक्षकः पाठं पाठयति । प्रश्नं पृच्छति ।
-------------------------------------------------- ।

७. नरेशः स्तोत्रं लिखति । गायति ।
-------------------------------------------------- ।

## * अतः इति उपयुज्य वाक्यानि रचयन्तु ।

१. मम मस्तके पीडा अस्ति । अहं शयनं करोमि ।
-------------------------------------------------- ।

२. अहं रुग्णः अस्मि । अहं विद्यालयं न गच्छामि ।
-------------------------------------------------- ।

३. देवालये पूजा अस्ति । जनाः देवालयं गच्छन्ति ।
-------------------------------------------------- ।

४. अद्य होली अस्ति । विद्यालये अवकाशः अस्ति ।
-------------------------------------------------- ।

५. परीक्षा अस्ति । छात्रः मन्दिरं गच्छति ।
-------------------------------------------------- ।

# गीतम् - १

मनसा सततं स्मरणीयम्,वचसा सततं वदनीयम्,
लोकहितं मम करणीयम् (२)
न भोगभवने रमणीयम्,न च सुखशयने शयनीयम्,
अहर्निशं जागरणीयम्,लोकहितं मम करणीयम् . . .मनसा सततं. . .
न जातु दुःखं गणनीयम्,न च निज सौख्यं मननीयम्
कार्यक्षेत्रे त्वरणीयम्,लोकहितं मम करणीयम् . . .मनसा सततं. . .
दुःखसागरे तरणीयम्,कष्टपर्वते चरणीयम्
विपत्तिविपिने भ्रमणीयम्,लोकहितं मम करणीयम् . . .मनसा सततं. . .
गहनारण्ये घनान्धकारे,बन्धुजना ये स्थिता गह्वरे,
तत्र मया सञ्चरणीयम्,लोकहितं मम करणीयम् . . .मनसा सततं. . .

# Sanskrit Curriculum

## Class - 6

# प्रथमं सोपानम्

* पुनः स्मारणम्

* तृतीया विभक्तिः [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]

सहयोगे
विनायोगे
साधनयोगे

**पाठबिन्दुः** – **तृतीयाविभक्तिः**

**पाठ्योपकरणानि**– स्फोरकपत्राणि, साधनत्वेन उपयोक्तुं योग्यानि वस्तूनि च ।

**पाठनक्रमः**–

**उपस्थापनम्** – कञ्चित् छात्रम् उत्थाप्य ताडनस्य अभिनयं कृत्वा 'अहं हस्तेन ताडयामि । अहं दण्डेन ताडयामि' – इति कथनेन उपस्थापनम् । एवमेव आकारान्त-ईकारान्त- स्त्रीलिङ्गशब्दानाम् अपि तृतीयाविभक्तिरूपाणि पाठनीयानि ।

**अभ्यासः**–

१. स्फोरकपत्राणां द्वारा तृतीयाविभक्तिरूपाणाम् अभ्यासः ।

२. शिक्षकः 'साधन' योग्यं वस्तु दर्शयति । छात्राः तद् दृष्ट्वा वाक्ये उपयुज्य वदेयुः ।

यथा – शिक्षकः – फेनकं दर्शयति ।

छात्राः – फेनकेन स्नानं करोमि ।

शिक्षकः – कर्तरीं दर्शयति ।

छात्राः – कर्तर्या कर्तनं करोमि ।

**प्रयोगः**– छात्राः केन किं कुर्वन्ति इति चिन्तयित्वा वदेयुः ।

**अवधातव्यः अंशः** – तृतीयाविभक्तिरूपेषु कुत्रचित् नकारस्य णत्वं भवति । कुत्रचित् न । यथा – रामेण, रावणेन । तद्विषये विशेषावधानं दत्त्वा शिक्षकः पाठयेत् ।

**विशेषः** – तृतीयाविभक्तिः विस्तरेण अग्रे पाठ्यते ।

**पाठबिन्दुः** – **सह**

**पाठ्योपकरणानि** – पिता-पुत्रः, माता-पुत्री – इत्यादियुगलस्य चित्राणि

**पाठनक्रमः** –

**उपस्थापनम्** – शिक्षकः कञ्चित् छात्रम् उत्थाप्य तस्य स्कन्धे स्वहस्तं संस्थाप्य गमनम् अभिनयन् 'अहं गोविन्देन सह गच्छामि' इति उक्त्वा उपस्थापनं कुर्यात् ।

एवमेव 'लतया सह, नलिन्या सह' इत्यादीनि स्त्रीलिरूपाणि अपि बोधनीयानि ।

**अभ्यासः** – शिक्षकः शब्दत्रयं वदति । छात्राः वाक्यं वदन्ति ।

यथा – रामः – रावण – युद्धम्

छात्राः रामः रावणेन सह युद्धं कृतवान् ।

शिक्षकः – सीता – लता – सम्भाषणम् ।

छात्राः – सीता लतया सह सम्भाषणम् करोति । (स्त्री)

**प्रयोगः** – छात्राः केन सह किं कुर्वन्ति इति वदेयुः ।

यथा – १. अहं मित्रेण सह अभ्यासं करोमि ।

२. अहं सख्या सह सम्भाषणमं करोमि ।

**विशेषः** – मातृभाषायां तु 'सह' प्रयोगे पूर्वं षष्ठीविभक्तिः प्रयुज्यते प्रायः । संस्कृते तु तृतीया एव इत विशेषः ।

**<u>पाठबिन्दुः</u> – विना**

**पाठ्योपकरणानि** — चित्राणि

**पाठनक्रमः** –

**उपस्थापनम्** – १. जलेन विना मीनः न जीवति ।

२. लवणेन विना भोजने रुचिः नास्ति – इत्यादीनां वाक्यानां द्वारा उपस्थापनं करणीयम् । एवमेव स्त्रीलिङ्गशब्दानाम् अपि उपस्थापनम् ।

**अभ्यासः**– शिक्षकः शब्दत्रयं वदति । छात्राः पूर्णं वाक्यं वदन्ति ।

यथा – १. शिक्षकः – जलं – जीवनं — कष्टम् ।

छात्राः – जलेन विना जीवनं कष्टम् ।

२. शिक्षकः – धनं — किं करोमि ?

छात्राः – धनेन विना किं करोमि ?

**प्रयोगः** – 'विना' शब्दम् उपयुज्य छात्राः वाक्यानि वदेयुः स्वातन्त्र्येण ।

**अवधातव्यः अंशः** – केचन छात्राः 'विना' इत्येतत् 'विनह' इति वा उच्चारयन्ति । शुद्धं रूपं ज्ञापनीयम्।

**विशेषः** – मातृभाषाप्रभावतः अत्रापि षष्ठीविभक्तेः आशङ्का भवति एव । सा निवारणीया ।

## सम्भाषणम्

<u>तृतीया विभक्तिः</u>

**सुरेशः** - हे देवदत्त ! भवान् केन सह आगतवान् ?
**देवदत्तः** - अहं जनकेन सह आगतवान् । भवान् केन सह आगतवान् ?
**सुरेशः** - अहं जनन्या सह आगतवान् ।
**देवदत्तः** - भवतः भगिनी न आगतवती ?
**सुरेशः** - सा लतया सह आगच्छति ।
**देवदत्तः** - भवान् कार्यक्रमानन्तरं मया सह आगच्छतु । वयं यानेन गमिष्यामः ।
**सुरेशः** - धन्यवादः किन्तु अहं जनन्या सह मातुलगृहं गच्छामि ।

**अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत् ।**
**जयेत् कदर्यं दानेन जयेत् जयेत् सत्येन चानृतम् ।।**

# स्वाध्यायः

* "सह" इति उपयुज्य वाक्यानि रचयन्तु ।

१. रमेशः ................ गच्छति । ( नरेश )
२. नरेन्द्रः ................ क्रीडति । ( विशाल )
३. पार्थः ................ भ्रमति । ( शौनक )
४. अक्षतः ................ पठति । ( अभिषेक )
५. भाग्येशः ................ तरति । ( गोपाल )
६. माया ................ उपविशति । (जया )
७. गार्गी ................ वदति । (ममता )
८. पुत्री ................ भोजनं पचति । (जननी )
९. ईशा ................ नृत्यति । ( हेमामालिनी )
१०. श्रेया ................ गीतं गायति । ( जया )
११. भ्राता ................ श्लोकंस्मरति । ( भगिनी )

* " विना" इति उपयुज्य वाक्यानि रचयन्तु ।

१. बालकः ................ ........ विद्यालयं गच्छति । ( जननी )
२. छात्रः ................ ........ न पठति । ( पुस्तक )
३. सीता ................ ........ वनं न गच्छति । (राम )
४. सैनिकः ................ ........ युद्धभूमिं न गच्छति । ( शस्त्र )
५. ................ ........ सिद्धिः नास्ति । ( विद्या )

* कः केन किं करोति इति लिखन्तु ।

१. जननी फेनकम् - वस्त्रक्षालनम्। ................................ ।
२. अहं लोकयानम् - प्रयाणम्। ................................ ।
३. त्वं लेखनी - लेखनम्। ................................ ।
४. वयं कूर्च - चित्रलेखनम्। ................................ ।
५. बालकः दण्ड - ताडनम्। ................................ ।
६. मापिका - मापनम्। ................................ ।
७. कर्तरी - कर्तनम्। ................................ ।
८. छुरीका - शाककर्तनम्। ................................ ।
९. चषक - पानम्। ................................ ।
१०. बाष्पस्थालिका - पाकं। ................................ ।

# द्वितीयं सोपानम्

* **भूतकालः (क्तवतु प्रत्ययान्तानि ) एकवचने**
गच्छति - गतवान् - गतवन्तः / गतवती - गतवत्यः

* **पञ्चमी विभक्तिः। [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]**

**भूतकालः**

**<u>पाठबिन्दुः</u> - 'क्तवतु' प्रत्ययान्तानि रूपाणि**

**पाठ्योपकरणानि –**

**पाठनक्रमः-**

**उपस्थापनम् –**

१. कश्चन छात्रः बहिः प्रेषणीयः। सः दृष्टिपथात् बहिः यदा गच्छति तदा शिक्षकः 'श्रीधरः गतवान्' इति वाक्यम् उक्त्वा उपस्थापनं कुर्यात्।

२. पुस्तकं दर्शयित्वा काञ्चित् 'एतत् वाक्यं पठतु' इति वक्तव्यम्। सा यदा पठनं समापयति तदा 'सीता पठितवती' इति कथनीयम्। एवं लिङ्गद्वयस्यापि रूपाणाम् उपस्थापनम्।

**अभ्यासः -**

१. आदौ रूपाभ्यासः कारणीयः। अध्यापकः यस्य क्रियापदस्य वर्तमानरूपं वदति तस्य क्तवतुप्रत्ययान्तपुंल्लिङ्गरूपस्य एकवचनं बहुवचनं च छात्राः वदेयुः। एवम् एव स्त्रीलिङ्गे अपि।

यथा - १. शिक्षकः - गच्छति

छात्राः - गतवान् – गतवन्तः।

२. शिक्षकः - गच्छति

छात्राः - गतवती – गतवत्यः।

२. क्रियापदकोष्टकस्य साहाय्येन कालपरिवर्तनाभ्यासः।

शिक्षकः वर्तमानकालिकं वाक्यं वदेत्। छात्राः भूतकाले परिवर्तनं कृत्वा वदेयुः।

यथाः - शिक्षकः - एषः पत्रं लिखति।

छात्राः - एषः पत्रं लिखितवान्।

३. तेषां वचनपरिर्तनाभ्यासः अपि कारणीयः

यथा - शिक्षकः - बालकः गतवान्।

छात्राः - बालकाः - गतवन्तः।

एवम् एव स्त्रीलिङ्गे अपि।

**प्रयोगः-** छात्राः तद्दिने पूर्वदिने वा प्रातः आरभ्य यद् यद् कृतवन्तः तस्य विवरणं कुर्युः।

यथा - १. अहं प्रातः षड्वादने उत्थितवान्। योगासनं कृतवान्। स्नानान्तरम् अल्पाहारं स्वीकृतवान्। कार्यालयं गतवान्।

२. अहं सप्तवादने उत्थितवान् । ......... ।

**अवधातव्यः अंशः** – पृच्छति, गृह्णाति, तिष्ठति, जानाति, ददाति – इत्यादीनां भूतकृदन्तरूपेषु वैलक्षण्यम् अस्ति । तानि विशेषतया पाठनीयानि ।

**विशेषः**– नपंसकलिङ्गे गतवत्, पठितवत् – इत्यादीनि रूपाणि भवन्ति । परन्तु व्यवहारे नपुंसकलिङ्गवाच्यस्य कर्तुः प्रयोगः अधिकः न भवति । अतः इदानीं तेषां रूपाणां पाठनं न आवश्यकम्।

**<u>पाठबिन्दुः</u> – पञ्चमीविभक्तिः**

**पाठ्योपकरणानि** – १. स्फोरकपत्राणि

**पाठनक्रमः** –

**१. उपस्थापनम्**

आदौ तसन्तं वाक्यं, ततः पञ्चमीविभक्तिप्रत्यययुक्तवाक्यं च उच्चार्य तयोः समानार्थकता दर्शनीया ।

यथा – सेवकः <u>ग्रामतः</u> आगच्छति ।

सेवकः <u>ग्रामात्</u> आगच्छति ।

वैद्यः <u>नगरतः</u> आगच्छति ।

वैद्यः <u>नगरात्</u> आगच्छति ।

एवमेव विद्यालयः, नदी, उद्यानं, वनम् – इत्यादीन् उपयुज्य रचितेषु वाक्येषु पञ्चम्यन्तं पदं स्वराघातपूर्वकम् उच्चार्य उपस्थापनं करणीयम् ।

**२. उपस्थापनम् ( रूपस्य )**

| पुं / न. | आकारान्त स्त्री | ईकारान्त स्त्री |
|---|---|---|
| आपणः | शाला | भगिनी |
| ग्रामः | पाकशाला | गौरी |
| वनम् | शाटिका | लेखनी |

एतादृशानां शब्दानां प्रथमान्तम् उक्त्वा शिक्षकेण पञ्चम्यन्तं वाचनीयम् ।

यथा – शिक्षकः – आपणः, छात्राः, – आपणात्

**अभ्यासः** – १. स्फोरकपत्रसाहाय्येन पञ्चमी ए.व, ब.व. रूपाणाम् अभ्यासः कारणीयः ।

यथा – शिक्षकः – ग्रामः　　　　छात्राः – ग्रामात्

शिक्षकः – नदी　　　　छात्राः – नद्याः

२. क. बालकः कुतः किम् आनीतवान् ?

ख. बालकः कुतः किं स्वीकरोति ?

ग. कुतः किं पतति ? इत्यादीन् प्रश्नान् पृष्ट्वा सूच्यशब्दान् दत्त्वा छात्रतः उत्तराणि प्राप्तव्यानि ।

यथा – शिक्षकः – आपणः – लेखनी

छात्राः – बालकः आपणतः लेखनीम् आनीतवान् ।

**प्रयोगः** – छात्राः गतेषु दिनेषु कुतः किम् आनीतवन्तः इति वदेयुः ।

यथा १. अहम् आपणतः लेखनीम् आनीतवान् ।

२. अहम् आपणतः कङ्कणम् आनीतवती ।

**पाठबिन्दुः पञ्चमीविभक्तिः – भयहेतोः**

**पाठनक्रमः –**

**उपस्थापनम्** – 'अहं गतसप्ताहे अरण्यं गतवान् आसम् । तत्र कश्चन व्याघ्रः आगतः । सः 'घुर्' इति गर्जनम् अकरोत् ।' तत् श्रुत्वा अहं भीतः । अहं व्याघ्रात् भीत ।

एताम् एतादृशीं वा घटनां विवृत्य उपस्थापनं करणीयम् ।

**अभ्यासः** – पुराणादिकथाम् अवलम्ब्य प्रश्नाः प्रष्टव्याः – 'कः कस्मात् / केभ्यः भीतः / न भीतः' इति । छात्राः उत्तराणि वदेयुः ।

यथा – शिक्षकः – उत्तरकुमारः कस्मात् भीतः ।

छात्राः – उत्तरकुमारः कौरवसैन्यात् भीतः ।

**प्रयोगः** – 'भवत्सु कः / का कस्मात् भीतः /भीता' इति अध्यापकः पृच्छेत् । छात्राः उत्तराणि वदेयुः ।

यथा – अहम् अन्धकारात् भीतः भवामि ।

मम भगिनी मार्जरात् भीता भवति ।

**पाठबिन्दुः – 'बहिः' इत्यस्य योगे पञ्चमी ।**

**पाठ्योकरणम् –**

**पाठनक्रमः –**

**उपस्थापनम्** – प्रकोष्ठस्य अन्तः छात्राः सन्ति । प्रकोष्ठात् बहिः किम् अस्ति ? इति पृष्ट्वा बहिः दृष्ट्वा 'प्रकोष्ठात् बहिः वृक्षः अस्ति' इति उक्त्वा उपस्थापनं करणीयम् ।

**अभ्यासः** – विद्यालयः, गृहम्, मन्दिरं, कार्यालयः इत्यादीनां बहिर्भागे किम् अस्ति इति अध्यापकः एकैकशः पृच्छेत् । छात्राः तदनुगुणम् उत्तराणि वदेयुः ।

यथा – विद्यालयात् बहिः क्रीडाङ्गणम् अस्ति ।

**प्रयोगः** – भवान् / भवती कस्मात् बहिः किं स्थापयति ? इति अध्यापकः पृच्छेत् । छात्राः उत्तराणि वदेयुः ।

उदा. – अहं गृहात् बहिः पादरक्षां स्थापयामि ।

**अवधातव्याः अंशाः –**

१. पाठनावसरे बहुवचनान्तरूपाणाम् अपि अभ्यासः कारणीयः । किन्तु बहुवचनान्तरूपाणि व्यवहारे आधिक्येन न प्रयुज्यन्ते इत्यतः तेषां निमित्तम् अत्यधिकप्राधान्यं दातव्यं नास्ति ।

२. 'व्याघ्रेण विभेति' इत्यादीनि वाक्यानि छात्राः वदेयुः । (भीत्यर्थशब्दयोगे तृतीयान्तस्य प्रयोगं कुर्युः) एतत् परिहरणीयम् ।

३. बहिर्योगे पञ्चमी । छात्राः प्रादेशिकभाषाप्रभावबलात् षष्ठीप्रयोगं कुर्युः । (षष्ठीप्रयोगः न प्रचुरः संस्कृतक्षेत्रे) अतः तत् निवारणीयम् ।

# सम्भाषणम्

## भूतकाल (क्तवतु)

**रिया -** सुप्रभातं कृति ! भवती कथम् अस्ति ?
**कृति -** सुप्रभातम् , अहं कुशलिनी अस्मि । भवती कथम् अस्ति ?
**रिया -** सानन्दा , किं भवती एकाकिनी आगतवती ?
**कृति -** आम् , मम जनकः कार्यार्थं मुम्बईनगरं गतवान् । जननी आपणं गतवती । अग्रजः मित्रस्य गृहं गतवान् ।
**रिया -** भवतु , भवती गणितस्य गृहकार्यं कृतवती वा ?
**कृति -** आम्, अहं कृतवती । भवती संस्कृतपाठं पठितवती ?
**रिया -** आम् , संस्कृतपाठं पठितवती उत्तराणि अपि लिखितवती ।

# स्वाध्यायः

* **एतेषां कालपरिवर्तनं करोतु ।**

१. सः भोजनं खादति । ........................................................ ।
२. बालकः प्रातः काले विद्यालयं गच्छति । ........................................................ ।
३. अहं गृहकार्यं करोमि । ........................................................ ।
४. बालिका संस्कृतं पठति । ........................................................ ।
५. नृपः शासनं करोति । ........................................................ ।
६. भवान् किं लिखति ? ........................................................ ।
७. युवकः दूरदर्शनं पश्यति । ........................................................ ।
८. जननी श्लोकं श्रृणोति । ........................................................ ।
९. भगिनी जलं पिबति । ........................................................ ।
१०. अहं संस्कृतं वदामि । ........................................................ ।

## * एतेषां कालपरिवर्तनं करोतु ।

| | पुंल्लिङ्गः | स्त्रीलिङ्गः |
|---|---|---|
| १. गच्छति । | .................. | .................. |
| २. पठति । | .................. | .................. |
| ३. क्रीडति । | .................. | .................. |
| ४. उत्तिष्ठति । | .................. | .................. |
| ५. वदति । | .................. | .................. |
| ६. उपविशति । | .................. | .................. |
| ७. पृच्छति । | .................. | .................. |
| ८. पश्यति । | .................. | .................. |
| ९. ददाति । | .................. | .................. |
| १०. प्रक्षालयति । | .................. | .................. |
| ११. जानाति । | .................. | .................. |
| १२. त्यजति । | .................. | .................. |
| १३. मिलति । | .................. | .................. |
| १४. गृह्णाति । | .................. | .................. |
| १५. श्रृणोति । | .................. | .................. |

## सम्भाषणम्

### पञ्चमीविभक्तिः

**संकेतः** - हे मित्र ! भवान् कुतः आगच्छति?
**विशदः** - अहं नटपुरग्रामात् आगच्छामि ।
**संकेतः** - ग्रामात् भवान् किम् आनीतवान् ?
**विशदः** - अहं ग्रामात् फलं, शाकं, मिष्टान्नं च आनीतवान् ।
**संकेतः** - फलं कुतः प्राप्तवान् ?
**विशदः** - वृक्षात् मित्र !
**संकेतः** - शाकं कुतः प्राप्तवान् ?
**विशदः** - आपणात् बन्धो !
**संकेतः** - मिष्टान्नं कुतः प्राप्तवान् ?
**विशदः** - मिष्टान्नं तु अम्बातः प्राप्तवान् भ्रात ! अम्बा विशेषतः भवतः कृते एव प्रेषितवती ।

# स्वाध्यायः

* **एतेषां शब्दानां आधारेण वाक्यानि रचयन्तु ।**

१. आकाश - जलम् - पतति ............................................................ ।
२. वृक्ष - फलम् - पतति ............................................................ ।
३. अश्व - सैनिक -पतति ............................................................ ।
४. आसन्दः - बालक - पतति ............................................................ ।
५. सोपानम् - वृद्ध - पतति ............................................................ ।
६. शिवजटा - गंगा - पतति ............................................................ ।
७. उत्पीठिका - पुस्तक -पतति ............................................................ ।
८. लेखनी - मसी - पतति ............................................................ ।
९. नलिका - जलम् - पतति ............................................................ ।
१०. अङ्गुली - मुद्रिका - पतति ............................................................ ।

## गच्छति / आगच्छति

१. प्रधानमन्त्री ........................ आगच्छति । ( विदेश )
२. जनकः ........................ आगच्छति । ( ग्राम )
३. हनुमान् ........................ आगच्छति । ( अयोध्या )
४. बालकाः ........................ गृहं गच्छन्ति । ( शाला )
५. अहं ........................ कार्यालयं गच्छामि । ( गृह )

## स्वीकरोति

१. छात्रः ....................... पुस्तकं स्वीकरोति । ( शिक्षक )
२. कन्या ....................... भूषणं स्वीकरोति । ( जननी )
३. ग्राहकः ....................... अन्नं स्वीकरोति । ( आपणिक )
४. अहं ....................... धनं स्वीकरोमि । ( जनक )
५. भवान् ....................... किं स्वीकरोति । ( महिला )

# तृतीयं सोपानम्

*　　**भविष्यत्कालः [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]**

*　　**अव्ययानि**
　　एव, इति, यदि - तर्हि, यथा - तथा, यदा - तदा
　　तः - पर्यन्तम्, अद्य - आरभ्य, श्वः - आरभ्य

**भविष्यकालः**

**<u>पाठ्योपकरणम्</u>** – क्रियापदकोष्टकम्

**पाठनक्रमः** –

**उपस्थापन्** – अन्तरदिने प्रचलिष्यमाणं कमपि कार्यक्रमं, पर्व, तत्सदृशं वा मनसि निधाय 'श्वः सङ्गीतकार्यक्रमः भविष्यति' इत्येवंप्रकारेण कथनेन भविष्यत्कालरूपस्य उपस्थापनं करणीयम् ।

**अभ्यासः**–

१. क्रियापदकोष्टकस्य साहाय्येन कालपरिवर्तनाभ्यासः ।

यथा – शिक्षकः – रमेशः काशीं गच्छति ।

छात्राः – रमेशः काशीं गमिष्यति ।

२. प्रश्नोत्तरम् (शिक्षकः एकैकम् उद्दिश्य एकं प्रश्नं पृच्छेत् । छात्राः उत्तरं वदेयुः ।)

यथा – शिक्षकः – भवान् श्वः किं पठिष्यति ?

छात्रः – अहं श्वः इतिहासं पठिष्यामि ।

**प्रयोगः**– सर्वेऽपि छात्राः स्वस्य अनन्तरदिनस्य कार्ययोजनां वदेयुः ।

यथा – १. अहं प्रातः षड्वदाने उत्थास्यामि । स्नानं करिष्यामि । अल्पाहारं स्वीकरिष्यामि । विद्यालयं गमिष्यामि । पाठं पठिष्यामि । ....

२. अहं सप्तवादने उत्थास्यामि । ......

**अवधातव्यः अंशः**– लिख (लेखिष्यति) मिल (मेलिष्यति) दृश् (द्रक्ष्यति) पा (पास्यति) ग्रह (ग्रहीष्यति) – इत्यादीनां धातूनां रूपेषु वैलक्षण्यम् अस्ति । तत् सम्यक् ज्ञापनीयम् ।

**विशेषः** – भविष्यदर्थे (अद्यतने न) यद्यपि लुट्लकारः अपि प्रयोक्तुं शक्यते, अत्र तु लृटः एव पाठनं क्रियते । तस्य एव रूपाणि पाठ्यन्ते ।

**पाठ्यबिन्दुः - एव**

**पाठ्योपकरणम् —** नित्योपयोगीनि वस्तूनि ।

**पाठ्यक्रमः** –

**उपस्थापनम्** – शिक्षकः सुधाखण्डं हस्तेन गृहीत्वा 'सुधाखण्डः हस्ते अस्ति' इति दर्शयेत् । अनन्तरं हस्तौ स्वपृष्ठतः नीत्वा छात्राः यथा न पश्येयुः तथा सुधाखण्डं हस्तान्तरे संस्थाप्य, पुनः हस्तौ पुरतः आनीय प्रश्नं करोति – "सुधाखण्डः कुत्र अस्ति ?" इति । केचन वामहस्तं पुनः केचन दक्षिणहस्तं च दर्शयन्ति । तदा शिक्षकः मुष्टिम् उद्घाट्य दर्शयित्वा 'सुधाखण्डः वामहस्ते एव अस्ति' इव वदन् उपस्थापनं कुर्यात् ।

**अभ्यासः** – 'बकासुरः भोजनम् एव इच्छति स्म ।' 'कुम्भकर्णः निद्राम् एव इच्छति स्म ।' – इत्यादीनि वाक्यानि छात्राणां द्वारा वाचनीयानि तदनुगुणान् प्रश्नान् पृष्ट्वा ।

**प्रयोगः** – छात्राः यदेव इच्छन्ति तद्विषये वक्तुम् अर्हन्ति ।

यथा – १. अहं मधुरमेव इच्छामि

२. अहं संस्कृतमेव पठामि ।

**अवधातव्यः अंशः** –

**विशेषः** – वाक्ये 'एव'कारस्य स्थानपरिवर्तनेन अर्थभेदः भवति ।

यथा – सः एव प्रातःकाले कार्यं करोति । (अन्यः न करोति)

सः प्रातःकाले एव कार्यं करोति । (प्रातःकाले एव, न अन्यदा)

सः प्रातःकाले कार्यमेव करोति । (अन्यत् न करोति)

सः प्रातःकाले कार्यं करोति एव । न पश्यति, न आदिसति, करोति एव)

**पाठबिन्दुः - इति**

**पाठ्योपकरणम्** – सुधाखण्डः, कृष्णफलकम्, अन्यवस्तूनि च ।

**पाठनक्रमः** –

**उपस्थापनम्** – शिक्षकः सुधाखण्डेन कृष्णफलके बृहदक्षरैः कमपि शब्दं (रामः) लिखति । अनन्तरम् 'अहं रामः' इति लिखितवान् । – इति कथनेन उपस्थानं करोति ।

**अभ्यासः**–

छात्राः महापुरुषाणां वाक्यानि स्मृत्वा कः किम् उक्तवान् इति वदेयुः ।

यथा –१. 'अहिंसा परमो धर्मः' इति बुद्धः उक्तवान् ।

२. 'ब्रह्म सत्यं जगन्मिथ्या' इति शङ्कराचार्यः उक्तवान् ।

३. 'जय जवान जय किसान' इति लालबहादूरशास्त्री उक्तवान् ।

**प्रयोगः**–

छात्राः स्वमाता, पिता, भ्राता वा किं वदति इति वदेयुः ।

यथा – १. मम पिता 'सम्यक् पठतु' इति वदति ।

२. मम माता 'शीघ्रं गृहम् आगच्छतु' इति वदति ।

**पाठबिन्दुः - यदि -तर्हि**

**पाठ्योपकरणम्** – उपनेत्रादीनि वस्तूनि

**पाठनक्रमः-**

**उपस्थापनम्** – शिक्षकः उपनेत्रं पातयितुम् उद्युक्तः इव अभिनयं कृत्वा वदति – 'यदि उपनेत्रं पतति, तर्हि नष्टं भवति' एवं क्रमेण उपस्थापनं करणीयम् ।

**अभ्यासः-**

शिक्षकः वाक्यद्वयं वदति । छात्राः 'यदि – तर्हि' योजयित्वा एकं वाक्यं वदन्ति ।

यथा – शिक्षकः – मशी नास्ति । लेखनी न लिखति ।

छात्राः – यदि मशी नास्ति तर्हि लेखनी न लिखति ।

शिक्षकः – संस्कृतं पठति । आनन्दं प्राप्नोति ।

छात्रः – यदि संस्कृतं पठति तर्हि आनन्दं प्राप्नोति ।

**प्रयोगः-** छात्राः स्वतन्त्रतया 'यदि – तर्हि' युक्तानि वदेयुः ।

**अवधातव्यः अंशः** – 'यदि' इत्यस्य साम्यवशात् छात्राः कदाचित् 'तर्हि' इत्येतस्य उच्चारणं 'तदि' इति कुर्वन्ति । तत् परिष्करणीयम् ।

**विशेषः** – 'यदि' इति प्रयुक्तं चेत् 'तर्हि' अपि प्रयोक्तव्यम् एव । यतः यच्छब्दः तच्छब्दसापेक्षः ।

**पाठबिन्दुः - यथा - तथा**

**पाठ्योपकरणम्** – कृष्णफलकम्, सुधाखण्डः च

**पाठनक्रमः-**

**उपस्थापनम्** – शिक्षकः कञ्चित् छात्रं समीपम् आह्वयति । स्वयं च कृष्णफलके किमपि चित्रं लिखति । छात्रमपि 'तथा लिखतु' इति वदति । यदा सः लिखति तदा 'यथा अहं लिखामि तथा एषः लिखति' इति कथनेन उपस्थापनं करोति ।

**अभ्यासः -** शिक्षकः विख्यातयोः द्वयोः नाम वदति । छात्राः तयोः तुलनां कृत्वा 'यथा – तथा' उपयुज्य वाक्यं वदन्ति ।

यथा – शिक्षकः – सौरव गंगूलि – अजय जडेजा

छात्राः – यथा सौरव गंगूलि क्रीडति तथा अजय जाडेजा न क्रीडति ।

**प्रयोगः -** 'यथा – तथा' इत्येतत् उपयुज्य छात्राः स्वातन्त्र्येण वाक्यानि वदेयुः ।

**अवधातव्याः अंशाः** – 'यथा राजा तथा प्रजा', 'यथा गुरुः तथा शिष्यः' – इत्यादीनि प्रसिद्धानि वाक्यानि सन्ति । छात्राः तानि वदेयुः अपि । परन्तु उपरि यानि सूचितानि तादृशानि एव व्यवहारे अधिकोपयोगीनि । अतः तादृशानि एव अधिकतया वाचनीयानि ।

**विशेषः** – यदि – तर्हि इत्यत्र यथा तथैव अत्रापि 'यथा' इत्यस्य अङ्गतया स्थितः यच्छब्दः तच्छब्दम् अपेक्षते एव ।

**पाठबिन्दुः - तः - पर्यन्तम्**

**पाठ्योपकरणम् —** लिखितफलकानि, भारतस्य मानचित्रम्

**पाठनक्रमः -**

**उपस्थापनम्** - विद्यालयस्य कक्ष्यायाः वा आरम्भसमयः समाप्तिसमयः च कृष्णफलके लेखनीयः ।

यथा - ६-०० — ८-००

अनन्तरं 'षड्वादनतः अष्टवादनपर्यन्तं कक्ष्या अस्ति' इत्यादिवाक्यकथनेन उपस्थापनं करणीयम् ।

**अभ्यासः-**

शिक्षकः लिखितं फलकं दर्शयति । तत्र कस्यचित् दिनचर्या लिखिता भवति । तद् दृष्ट्वा छात्राः वदेयुः।

यथा - ६.०० — ८.०० योगासनम्

८.०० — ८.३० ध्यानम्

९.०० — १०.०० अभ्यासः

विजयः षड्वादनतः अष्टवादनपर्यन्तं योगासनं करोति ।

अष्टवादनतः सार्ध-अष्टवादनपर्यन्तं ध्यानं करोति ।

नववादनतः दशवादनपर्यन्तम् अभ्यासं करोति ।

**प्रयोगः-** छात्राः स्वविद्यालय-कार्यालयादीनां कार्यकालं वदेयुः ।

यथा - १. मम विद्यालयः एकादशवादनतः चतुर्वादनपर्यन्तम् अस्ति ।

२. मम कार्यालयः दशवादनतः पञ्चवादनपर्यन्तम् अस्ति ।

**अवधातव्यः अंशः-**

'पञ्चवादनं तः, षड्वादनं तः' - इत्यादिरूपाणि छात्राः वदन्ति । तत् परिहरणीयम् ।

**विशेषः** - तः - पर्यन्तम् — कालविषये यथा, तथा देशविषये अपि उपयुज्यते ।

यथा - काश्मीरतः कन्याकुमारीपर्यन्तं भारतदेशः अस्ति ।

अतः तादृशप्रयोगः अपि पाठनीयः । तदर्थं मानचित्रस्यापि उपयोगः कर्तुं शक्यते ।

**पाठबिन्दुः - अद्य आरभ्य, श्वः आरभ्य**

**पाठ्योपकरणम् —**

**पाठनक्रमः -**

**उपस्थापनम्** - तस्मात् दिनात् यदि तत्र नगरे समीपे वा कोऽपि कार्यक्रमः आरभ्यते तर्हि तत् ज्ञात्वा 'अद्य आरभ्य सङ्गीतोत्सवः प्रचलति' इत्यादिवाक्यकथनेन उपस्थापनं करणीयम् ।

एवमेव 'श्वः आरभ्य' इत्यस्यापि ।

**अभ्यासः-** 'अहम् अद्य आरभ्य योगासनं करोमि, अहं श्वः आरभ्य प्राणायामं करिष्यामि' - इत्यादिक्रमेण छात्राः स्वेन तद्दिने अनन्तरदिने वा आरप्स्यमाणानि कार्याणि वदेयुः ।

**प्रयोगः-** छात्राः परस्परम् 'वयम् अद्य आरभ्य संस्कृतसम्भाषणं कुर्मः' इत्यादीनि वाक्यानि वदेयुः ।

**अवधातव्यः अंशः** - छात्राः 'अद्यतः आरभ्य, श्वः तः आरभ्य' - इत्यादीनि यथा न वदेयुः तथा जागरूकता आश्रयणीया ।

**पाठबिन्दुः - यदा - तदा**

**पाठनक्रमः**

**उपस्थापनम्** – यदा रामः आसीत् तदा रावणः अपि आसीत् ।

यदा बुभुक्षा भवति तथा भोजनं करोमि । – इत्यादीनां वाक्यानां द्वारा उपस्थापनं करणीयम् ।

**अभ्यासः** – शिक्षकः वाक्यद्वयं वदति । छात्राः 'यदा – तदा' योजयित्वा एकं वाक्यं वदेयुः ।

यथा – शिक्षकः – १. दिल्लीं गमिष्यामि । राष्ट्रपतिभवनं द्रक्ष्यामि ।

छात्राः – यदा दिल्लीं गमिष्यामि तदा राष्ट्रपतिभवनं द्रक्ष्यामि ।

२. बुभुक्षा भवति । भोजनं करोतु ।

छात्राः – यदा बुभुक्षा भवति तदा भोजनं करोतु ।

**प्रयोगः**– छात्राः 'यदा – तदा' शब्दौ उपयुज्य स्वतन्त्र्येण वाक्यानि वदेयुः ।

**अवधातव्यः अंशः** – 'यदा – तदा' 'यदि – तर्हि' एतयोः सूक्ष्मः अर्थभेदः अस्ति । यत्र कालविषये एव विशेषतया ज्ञापनं क्रियते तत्र 'यदा – तदा' इत्यस्य प्रयोगः । अन्यत्र तु 'यदि – तर्हि' – इत्यस्य ।

## सम्भाषणम्

### भविष्यत्कालः

**हर्षः** - हरिः ॐ संकेत ! किं करोति भवान् ?

**संकेतः** - किं भवान् न जानाति ? श्वः संस्कृतस्य परीक्षा भविष्यति ।

**हर्षः** - अरे ! जानामि अतः एव अहं अत्र आगतवान् । भवान् संस्कृतपठनाय कदा उपवेक्ष्यति ?

**संकेतः** - अहं इदानीं गणितस्य कार्यं करोमि । तदनन्तरं संस्कृतं पठिष्यामि ।

**हर्षः** - अहं तावत् श्लोकान् स्मरिष्यामि । ध्येयः आगमिष्यति वा ?

**संकेतः** - आम् , सः आगमिष्यति । ततः वयं मिलित्वा वाक्यानि लेखिष्यामः ।

**हर्षः** - अस्तु ।

**रात्रिर्गमिष्यति भविष्यति सुप्रभातम् ,**
**भास्वानुदेस्यति हसिष्यति पङ्कजश्रीः ।**
**इत्थं विचिन्तयति कोशगते द्विरेफे**
**हा हन्त ! हन्त नलिनीं गज उज्जहार ।।**

**करिष्यामि करिष्यामि, करिष्यामीति चिन्तया।**
**मरिष्यामि मरिष्यामि, मरिष्यामीति विस्मृतम्।।**

EKLAVYA SANSKRIT ACADEMY

# स्वाध्यायः

* **एतेषां कालपरिवर्तनं करोतु ।**

१. बालकः विद्यालयं गच्छति । ........................................................ ।
२. महिला दूरदर्शनं पश्यति । ........................................................ ।
३. वृद्धः श्लोकं श्रृणोति । ........................................................ ।
४. बालिका पाठं पठति। ........................................................ ।
५. भवान् किं करोति ? ........................................................ ।

* **एतेषां बहुवचनं करोतु ।**

१. यात्रिकः जलं पास्यति। ........................................................ ।
२. नृपः दानं दास्यति। ........................................................ ।
३. बालकः श्लोकं स्मरिष्यति। ........................................................ ।
४. अश्वः रणांगणे धाविष्यति। ........................................................ ।
५. भगिनी वस्त्रं क्षालयिष्यति। ........................................................ ।

* **एतेषां कालपरिवर्तनं करोतु ।**

१. अहं संस्कृतं वदामि । ........................................................ ।
२. अहं गीतं गायामि । ........................................................ ।
३. अहं पुस्तकं स्थापयामि । ........................................................ ।
४. अहं आसन्दे उपविशामि । ........................................................ ।
५. अहं पत्रं प्रेषयामि । ........................................................ ।

* **एतेषां बहुवचनं करोतु ।**

१. अहं कन्दुकेन क्रीडिष्यामि । ........................................................ ।
२. अहं दूरदर्शनं न द्रक्ष्यामि । ........................................................ ।
३. अहं संस्कृतं ज्ञास्यामि । ........................................................ ।
४. अहं दूरभ्यासं त्यक्ष्यामि । ........................................................ ।
५. अहं शिक्षकः भविष्यामि । ........................................................ ।

## स्वाध्यायः

* एतेषां कालपरिवर्तनं करोतु ।

१. गच्छति । ..................
२. पठति । ..................
३. क्रीडति । ..................
४. उत्तिष्ठति । ..................
५. वदति । ..................
६. उपविशति । ..................
७. पृच्छति । ..................
८. पश्यति । ..................
९. ददाति । ..................
१०. प्रक्षालयति । ..................
११. जानाति । ..................
१२. त्यजति । ..................
१३. मिलति । ..................
१४. गृह्णाति । ..................
१५. श्रृणोति । ..................

## स्वाध्यायः

* यदि - तर्हि इत्यस्य प्रयोगं कृत्वा वाक्यानि रचयन्तु ।

१. परिश्रमं करोति। फलं प्राप्नोति। .................................................... ।
२. दूरदर्शनं द्रक्ष्यति। नेत्रं नश्यति। .................................................... ।
३. भवान् पठति। परीक्षायां उत्तीर्णः भवति। .................................................... ।
४. निद्रा आगच्छति। शयनं करोतु। .................................................... ।
५. सर्वे सत्कार्यं कुर्वन्ति। देशस्य उन्नतिः भवति। .................................................... ।

* यथा - तथा इत्यस्य प्रयोगं कृत्वा वाक्यानि रचयन्तु ।

१. सचिनः क्रीडति। राहुलः न क्रीडति। .................................................... ।
२. भवान् इच्छति। करोतु। .................................................... ।
३. लता गायति। मनोरमा न गायति। .................................................... ।
४. भवती इच्छति। अहं इच्छामि। .................................................... ।
५. राजा कार्यं करोति। प्रजा कार्यं करोति। .................................................... ।

**राज्ञि धर्मिणि धर्मिष्ठाः पापे पापरताः सदा ।**
**राजानम् अनुवर्तन्ति यथा राजा तथा प्रजा ।।**

* यदा - तदा इत्यस्य प्रयोगं कृत्वा वाक्यानि रचयन्तु ।

१. अहं गृहं गच्छामि। माता जलं ददाति। .................................................................. ।
२. भवान् आगतवान्। महेशः अपि आगतवान्। .................................................................. ।
३. जननी दास्यति। अहं खादिष्यामि। .................................................................. ।
४. सूर्यः उदयति। खगः नीडं त्यजति। .................................................................. ।
५. ज्वरः भवति। औषधं स्वीकरोमि। .................................................................. ।

**यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
**अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।।**

## स्वाध्यायः

## * समयानुसारं दिनचर्यां लिखन्तु ।

१. ...................... तः ...................... पर्यन्तं ...................... ।
२. ...................... तः ...................... पर्यन्तं ...................... ।
३. ...................... तः ...................... पर्यन्तं ...................... ।
४. ...................... तः ...................... पर्यन्तं ...................... ।
५. ...................... तः ...................... पर्यन्तं ...................... ।
६. ...................... तः ...................... पर्यन्तं ...................... ।
७. ...................... तः ...................... पर्यन्तं ...................... ।
८. ...................... तः ...................... पर्यन्तं ...................... ।
९. ...................... तः ...................... पर्यन्तं ...................... ।
१०. ...................... तः ...................... पर्यन्तं ...................... ।

# चतुर्थं सोपानम्

* **चतुर्थीविभक्तिः [ अ.पुं , आ.स्त्री , ई. स्त्री , नपुं. ]**
* **सम्बन्धकभूतकृदन्तः - त्वा / य**
* **हेत्वर्थभूतकृदन्तः - तुम्**

**<u>पाठबिन्दुः</u> चतुर्थीविभक्तिः - दानार्थे, रुच्यर्थे, नमः योगे च**

**पाठ्योपकरणानि** – स्फोरकपत्राणि

**पाठनक्रमः–**

**उपस्थापनम्** (अर्थस्य) – कर्णः ब्राह्मणस्य कृते कवचं कुण्डलं च दत्तवान् ।

कर्णः ब्राह्मणाय कवचं कुण्डलं च दत्तवान् ।

शिवः अर्जुनस्य कृते पाशुपतास्त्रं दत्तवान् ।

शिवः अर्जुनाय पाशुपतास्त्रं दत्तवान् ।

इत्यादिभिः वाक्यैः कृतेप्रयोगः विभक्त्यन्तप्रयोगश्च समानार्थकः इति स्वराघातपूर्वकं ज्ञापयित्वा अर्थस्य उपस्थापनं करणीयम् ।

**उपस्थापनम्** (रूपस्य) – रामस्य कृते रामाय, सीतायाः कृते – सीतायै – इत्यादिनि रूपाणि उक्त्वा रूपस्य उपस्थापनम् ।

स्फोरकपत्रसाहाय्येन चतुर्थी ए.व., ब.व. रूपाणाम् उपस्थापनं करणीयम् ।

| | |
|---|---|
| यथा – शिक्षकः – रामः | छात्रः – रामाय |
| शिक्षकः – सीता | छात्रः – सीतायै |
| शिक्षकः – गौरी | छात्रः – गौर्यै |

एवमेव सर्वनामशब्दानाम् अपि ।

**अभ्यासः** –

१. कः कस्मै किं ददाति ? इति प्रश्नं पृष्ट्वा छात्रेभ्यः सूचकशब्दाः दातव्याः । छात्राः उत्तराणि वदेयुः ।

यथा – शिक्षकः – माता – पुत्रः – क्षीरम्

रमेशः – भगिनी – शाटिका

छात्राः – माता पुत्राय क्षीरम् ददाति ।

रमेशः भगिन्यै शाटिकां ददाति ।

२. 'रोचते' प्रयोगे अपि चतुर्थीविभक्तिः भवति ।

यथा – बालकाय मधुरं रोचते ।

कस्मै किं रोचते इति प्रश्नपूर्वकं वाक्यानि वाचनीयानि ।

३. 'नमः' योगे अपि चतुर्थीविभक्तिः भवति ।

'कस्मै नमः' इति वदन्तु इति उक्त्वा छात्रद्वारा वाक्यानि वाचनीयानि ।

यथा – दुर्गायै नमः । सरस्वत्यै नमः ।

**प्रयोगः** –

१. कः कस्मै किं दातुं न इच्छति / इष्टवान् इति छात्राः वदेयुः ।

यथा – १. कैकेयी रामाय राज्यं दातुं न इष्टवती ।

२. अहं मित्राय लेखनीं दातुं न इच्छामि ।

२. 'कस्मै किं न रोचते' इति छात्राः वदेयुः ।

यथा – १. मह्यं तिक्तं न रोचते ।

२. कोपः कस्मै अपि न रोचते ।

३. 'कस्मै / केभ्यः नमः इति वक्तव्यम् ?' इति पृष्ट्वा वाक्यानि वाचनीयानि ।

यथा – १. 'सर्वेभ्यः नमः' इति सभायां वक्तव्यम् ।

२. दरिद्रदेवाय नमः इति जनैः वक्तव्यम् ।

**अवधातव्याः अंशाः** –

१. द्वितीया-तृतीययोः पाठनावसरे यथा चतुर्विद्याः शब्दाः सर्वनामशब्दाश्च स्वीकृताः तथैव अत्रापि करणीयम् ।

२. 'रामस्य कृते – रामाय' एतयोः अर्थः समानः इति ज्ञापनम् ।

कृते प्रयोगस्य यथा, तथा चतुर्थीविभक्त्यरूपस्यापि ज्ञानं छात्राणां भवतु इति उद्देशेन तस्य प्रयोगः आधिक्येन कारणीयः ।

३. छात्राः कदाचित् 'रामस्य कृते' इति वदेयुः । तन्नाम चतुर्थ्यन्तरूपम् उक्त्वा 'कृते' पदम् अपि योजयेयुः । तत् परिहरणीयम् ।

**'क्त्वा' प्रत्ययः**

**<u>पाठबिन्दुः</u> – 'क्त्वा' प्रत्ययान्तानि रूपाणि**

**पाठ्योपकरणानि** – क्रियापदकोष्टकम्

**पाठनक्रमः** –

**उपस्थापनम्** – शिक्षकः कश्चित् छात्रं कक्ष्यातः बहिः प्रेषयति । अनन्तरम् अन्तः आह्वयति । तस्य आगमनानन्तरं –'सुधीरः तत्र गच्छति, अत्र आगच्छति' इति वाक्यद्वयम् उक्त्वा – 'इदानीं अहम् एकं वाक्यं वदामि – 'सुधीरः तत्र गत्वा अत्र आगच्छति' – इति कथनेन उपस्थापनं करणीयम् । तत्र 'गत्वा' इत्येतस्य कथने अधिकः स्वराघातः करणीयः । एवमेव पठित्वा, लिखित्वा, खादित्वा – इत्यादीनाम् अपि ।

**अभ्यासः** – १. क्रियापदकोष्टके क्रियापदानां लट्लकाररूपं क्त्वान्तरूपं च वाचनीयम् ।

२. शिक्षकः वाक्यद्वयं वदति । छात्राः एकं वाक्यं वदन्ति ।

यथा – शिक्षकः – सः कार्यं करोति । धनं सम्पादयति ।

छात्राः – सः कार्यं कृत्वा धनं सम्पादयति ।

**प्रयोगः**– छात्राः बहूनि क्त्वान्तानि एकस्मिन् वाक्ये उपयुज्य वदेयुः ।

यथा – अहं गृहं गत्वा, कार्यं कृत्वा, क्षीरं पीत्वा विश्रान्तिं स्वीकरोमि ।

**अवधातव्यः अंशः** – दत्त्वा, दृष्ट्वा इत्यादिषु रूपभेदः स्पष्टीकरणीयः ।

**विशेषः** – दत्त्वा – इत्यत्र तु तकारस्य द्वित्वम् अपि अस्ति ।

**पाठबिन्दुः - तुमुन्प्रत्ययान्तानि रूपाणि**

**पाठ्योपकरणम्** – क्रियापदकोष्टकम्

**पाठनक्रमः –**

**उपस्थापनम्** – पाठं पठितुं विद्यालयं गच्छामि। सङ्गीतं श्रोतुं आकाशवाणी प्रवर्तयामि – इत्यादिवाक्यद्वारा उपस्थापनम्।

**अभ्यासः** – क्रियापदकोष्टकस्थानां क्रियापदानां लटि रूपं शिक्षकः वदति। छात्राः तुमुन्नन्तरूपं वदन्ति।

यथा – शिक्षकः – नयति

छात्राः – नेतुम्

**प्रयोगः** – छात्राः क्रियापदकोष्टकं दृष्ट्वा तुमुन्नन्तानि रूपाणि उपयुज्य वाक्यानि वदन्ति।

**अवधातव्याः अंशाः** –

१. धातूनां सेट्–अनिट्व्यवस्थाकारणतः तुमुन्नन्तेषु रूपभेदः भवति।

यथा – पठ – सेट् –पठितुम्

पा – अनिट् – पातुम्

२. प्रष्टुं, द्रष्टुं, ग्रहीतुम् – इत्यादीनि शुद्धरूपाणि ज्ञापनीयानि।

## सम्भाषणम्

**चतुर्थीविभक्तिः**

**भाग्यश्रीः** - नमस्ते ! आचार्यः ।

**आचार्यः** - हरिः ॐ । वत्से ।

**भाग्यश्रीः** - किम भवान् छात्रेभ्यः पुरस्काराणि आगतवान् ?

**आचार्यः** - आम् , अहम् आनीतवान् ।

**भाग्यश्रीः** - प्रथमं पुरस्कारं कस्मै यच्छति ?

**आचार्यः** - प्रथमं पुरस्कारं आकाङ्काक्षायै यच्छामि। द्वितीयं मानस्यै यच्छामि । तृतीयं जैनिलाय दास्यामि।

**भाग्यश्रीः** - मह्यम् एकम् अपि न ?

**आचार्यः** - अहं भवत्यै कथं यच्छामि ? भवती तु स्पर्धादिवसे अनुपस्थिता आसीत् ।

**भाग्यश्रीः** - आम् , आगामीस्पर्धायाम् अहम् अवश्यम् उपस्थिता भविष्यामि।

**आचार्यः** - उत्तमम् , तदा अहं भवत्यै अपि पुरस्कारं दास्यामि । चलतु इदानीं कक्षा गच्छामः ।

**कृष्णाय वासुदेवाय हरये परमात्मने ।**
**प्रणतः क्लेशनाशाय गोविन्दाय नमो नमः ।।**

## स्वाध्यायः

* **कः करमै / कस्यै किं ददाति इति लिखन्तु ।**

१. शिक्षकः ....................... पुस्तकं ददाति । ( छात्र )
२. नृपः ....................... दानं ददाति । (भिक्षुक )
३. ग्राहकः ....................... धनं ददाति । ( आपणिक )
४. माता ....................... वस्त्रं यच्छति । ( पुत्र )
५. पुत्रः ....................... धनं यच्छति । ( जनक )
६. छात्रः ....................... लेखनीं यच्छति । (शिक्षिका )
७. पिता ....................... घटीयन्त्रं यच्छति । ( कन्या )
८. युवकः ....................... उपनेत्रं ददाति । ( वृद्धा )
९. भ्राता ....................... उपहारं ददाति । ( भगिनी )
१०. पतिः ....................... शाटिकां ददाति । ( पत्नी )

* **कस्मै / कस्यै नमः इति लिखन्तु ।**

१. ....................... नमः । ( शारदा )
२. ....................... नमः । ( सरस्वती )
३. ....................... नमः । ( गणेश )
४. ....................... नमः । ( शिव )
५. ....................... नमः । ( गुरु )

## सम्भाषणम्

### आपणे मेलनम्

**सिद्धार्थः** - हरिः ॐ । सत्येशः ।
**सत्येशः** - हरिः ॐ । सिद्धार्थः भवान् अत्र किं क्रेतुम् आगतवान् ?
**सिद्धार्थः** - अहं कन्दुकं पादत्राणं , ध्वनिमुद्रिका च क्रेतुम् आगतवान् ?
**सत्येशः** - अहं पुस्तकम्, युतकम् च लेखनीम् नेतुं आगतवान् ।
**सिद्धार्थः** - आगच्छतु । तत्र गत्वा युतकानि पश्यामः ।
**सत्येशः** - चलतु (चलन्तौ ) सिद्धार्थ ! भवान् प्रातः काले कदा उत्तिष्ठति ?
**सिद्धार्थः** - अहं षट्वादने उत्तिष्ठामि । उत्थाय दन्तधावनं करोमि स्नानं च करोमि । ततः पठितुं उपविशामि । तदनन्तरं विद्यालयं गच्छामि । भवान् विद्यालयं गत्वा प्रथमं किं करोति ?
**सत्येशः** - अहं विद्यालयं गत्वा प्रार्थनां करोमि । ततः क्रीडितुं क्रीडाङ्गणं गच्छामि । क्रीडित्वा कक्षां आगच्छामि । कक्षां आगत्य पाठान् पठामि ।
**सिद्धार्थः** - उत्तमम् । पश्यतु , उत्तमानि सुन्दराणि च युतकानि सन्ति ।
**सत्येशः** - एतत् नारङ्गवर्णम् उत्तमम् अस्ति । (नीत्वा) चलतु अधुना गच्छामः ।
**सिद्धार्थः** - आम् , चलतु । गृहं गत्वा गृहकार्यं कर्तव्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY

# स्वाध्यायः

*     "तुम्" इत्युपयुज्य वाक्यानि रचयन्तु ।

१. बालकः पाठं पठति। भोजनं करोति।

.......................................................... ।

२. अर्चकः देवालयं गच्छति। देवम् अर्चति।

.......................................................... ।

३. बालकः गृहकार्यं करोति। क्रीडति।

.......................................................... ।

४. आपणिकः फेनकं क्रीणाति। हस्तं प्रक्षालयति।

.......................................................... ।

५. माता भोजनं पचति । परिवेषयति ।

.......................................................... ।

६. बालकः श्लोकं स्मरति । वदति ।

.......................................................... ।

७. अहं हस्तं प्रक्षालयामि । भोजनं करोमि ।

.......................................................... ।

८. अहं प्रातः उत्तिष्ठामि । देवं नमामि ।

.......................................................... ।

९. अहं उपविशामि । दुग्धं पिबामि ।

.......................................................... ।

१०. अहं गच्छामि । आनयामि ।

.......................................................... ।

**उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।**
**सज्जनानां स्वभावोऽयं केनेन्दुः शीतली कृतः ।।**

*     एतेषां कालपरिवर्तनं करोतु ।

१. गच्छति । ...................
२. पठति । ...................
३. क्रीडति । ...................
४. उत्तिष्ठति । ...................
५. वदति । ...................
६. उपविशति । ...................
७. पृच्छति । ...................
८. पश्यति । ...................
९. ददाति । ...................
१०. प्रक्षालयति । ...................
११. जानाति । ...................
१२. त्यजति । ...................
१३. मिलति । ...................
१४. गृह्णाति । ...................
१५. श्रृणोति । ...................

EKLAVYA SANSKRIT ACADEMY

# स्वाध्यायः

*  "त्वा"  इत्युपयुज्य वाक्यानि रचयन्तु ।

१. अहं पठामि । विद्यालयं गच्छामि । ........................................................ ।
२. बालकः देवम् अर्चति । देवालयं गच्छति । ........................................................ ।
३. जनः जीवति । जनः खादति । ........................................................ ।
४. अहं प्रार्थनां करोमि । मन्दिरं गच्छामि । ........................................................ ।
५. बालकः जलं पिबति । प्रपां गच्छति । ........................................................ ।
६. अहं चलचित्रं पश्यामि। चलचित्रगृहं गच्छामि। ........................................................ ।
७. बालकाः क्रीडन्ति । क्रीडाङ्गणं गच्छन्ति । ........................................................ ।
८. धावकः धावति । क्रीडाङ्गणं गच्छति । ........................................................ ।
९. रामस्य सेना सेतुं निर्माति। लङ्कां गच्छति। ........................................................ ।
१०. भगिनी  चाकलेहं खादति । क्रीणाति । ........................................................ ।

*  एतेषां कालपरिवर्तनं करोतु ।

१. गच्छति । ...................
२. पठति । ...................
३. क्रीडति । ...................
४. उत्तिष्ठति । ...................
५. वदति । ...................
६. उपविशति । ...................
७. पृच्छति । ...................
८. पश्यति । ...................
९. ददाति । ...................
१०. प्रक्षालयति । ...................
११. जानाति । ...................
१२. त्यजति । ...................
१३. मिलति । ...................
१४. गृह्णाति । ...................
१५. श्रृणोति । ...................

# पञ्चमं सोपानम्



* **वर्णवाचकाः शब्दाः ( षष्ठीविभक्त्या सहितम् )**
श्वेतः, कृष्णः, रक्तः, नीलः, पीतः, हरितः, कषायः

* **रुचिवाचकाः शब्दाः ( षष्ठीविभक्त्या सहितम् )**
मधुरः, कटुः, आम्लः, तिक्तः, कषायः, लवणः

* **बन्धुवाचकाः शब्दाः ( षष्ठीविभक्त्या सहितम् )**

* **कति / कियत्**

**पाठबिन्दुः – वर्णवाचकाः शब्दाः**

**पाठ्योपकरणानि** – तत्तद्वर्णयुतानि वस्तूनि, कागदानि, चित्राणि वा ।

**पाठनक्रमः–**

**उपस्थापनम्** – तत्तद्वर्णयुक्तं वस्तु हस्तेन गृहीत्वा दर्शयित्वा – 'सञ्चिकायाः वर्णः नीलः, लेखन्याः वर्णः हरितः' – इत्यादिक्रमेण कथनेन उपस्थापनं करणीयम् ।

**अभ्यासः** – तत्तद्वर्णयुक्तानि चित्राणि दर्शयित्वा 'एतस्य वर्णः कः ?' इति प्रश्नः करणीयः । छात्राः उत्तरं वदेयुः ।

यथा – शिक्षकः – नीलवर्णा सञ्चिकां गृहीत्वा 'एतस्याः वर्णः कः ?'

छात्राः – तस्याः वर्णः नीलः ।

**प्रयोगः** – छात्राः कक्ष्यायाम् उपस्थितानाम् अन्येषां वस्त्र-लेखन्यादीनां वर्णविषये परस्परं वाक्यानि वदेयुः ।

यथा – सुनीलस्य युतकस्य वर्णः श्वेतः ।

ममतायाः शाटिकायाः वर्णः पीतः ।

**अवधातव्यः अंशः** – यद्यपि मिश्रवर्णाः बहवः सन्ति, तथापि अत्र श्वेतः, कृष्णः, रक्तः, नीलः, पीतः, हरितः, कषायः – इत्येतेषां वर्णानां पाठनं पर्याप्तम् । अधिकज्ञानार्थं 'कोषं पश्यन्तु' इति छात्राः बोधनीयाः ।

**विशेषः** – वस्त्रं श्वेतं, लेखनी नीला, आकाशः नीलः – इत्यादिक्रमेण विशेषणविशेषभावसहितस्य वाक्यस्य पाठनम् अत्र न क्रियते । अत्र तु 'शाटिकायाः वर्णः श्वेतः' इति क्रमेण एव पाठनं क्रियते ।

**पाठबिन्दुः रुचिवाचकाः शब्दाः**

**पाठ्योपकणानि** – विभिन्नरुचिसहितानि वस्तूनि । यथा – चाकलेहः, आमलकम्, मरीचिका, कारवेल्लम् इत्यादयः ।

**पाठनक्रमः –**

**उपस्थापनम्** – विभिन्नरुचिसहितं वस्तु दर्शयित्वा 'चाकलेहस्य रुचिः मधुरः, मरीचिकायाः रुचिः कटुः' इत्यादिक्रमेण उपस्थापनं करणीयम् ।

**अभ्यासः** – तत्तद्रुचिसहितानि वस्तूनि दर्शयित्वा शिक्षकः 'एतस्य रुचिः का: ?' इति प्रश्नं पृच्छेत् । छात्राः उत्तरं वदेयुः ।

यथा – शिक्षकः – तिन्त्रिणीं दर्शयित्वा – तिन्त्रिण्याः रुचिः का ?

छात्राः तिन्त्रिण्याः रुचिः आम्लः ।

**प्रयोगः**– छात्राः अन्येषामपि पदार्थानां रुचिं वदेयुः ।

यथा – १. तक्रस्य रुचिः आम्लः ।

२. कारवेल्लस्य रुचिः तिक्तः ।

**व्याकरणम्**– रुचिवाचकाः शब्दाः पुंल्लिङ्गाः एव । (रुचिशब्दस्तु स्त्रीलिङ्गे)

**अवधातव्यः अंशः** – मधुरः, कटुः, आम्लः, तिक्तः, कषायः, लवणः – इत्येते षड्रसाः । (षड्रसोपेतभोजनम् इति व्यवहारः अतः एव) ते एव पाठनीयाः ।

**विशेषः** – अत्रापि विशेषणाविशेष्यभावसहितानां वाक्यानां पाठनं न क्रियते । 'शर्करायाः रुचिः मधुरः' – इत्यादिक्रमेण एव पाठनं क्रियते ।

**<u>पाठबिन्दुः</u> – बन्धुवाचकाः शब्दाः**

**पाठ्योपकरणानि** –

**पाठनक्रमः** –

**उपस्थापनम्** – श्रीराम–दशरथादीनां पुराणप्रसिद्धानां सम्बन्धकथनेन सम्बन्धवाचकाः शब्दाः स्मारणीयाः । यथा – रामः दशरथस्य पुत्रः ।

**अभ्यासः** – पुराणकथाम् अवलम्ब्य छात्राः अधिकानि वाक्यानि वदेयुः ।

यथा – १. दशरथः रामस्य पिता ।

लवः दशरथस्य पौत्रः ।

दशरथः लवस्य पितामहः ।

**प्रयोगः**– छात्राः स्वबान्धवानां विषये किमपि वदेयुः ।

यथा – १. मम श्यालः यन्त्रागारे कार्यं करोति ।

२. मम पितृगिनी काश्यां निवसति ।

**अवधातव्यः अंशः** – छात्राः बहून् बन्धुवाचकशब्दान् पृच्छन्तः भवति । परन्तु तेषां ज्ञापनार्थमेव अधिकः समयः न यापनीयः । कोषपरिशीलनेन ते शब्दाः ज्ञातव्याः इति सूचना दातव्या ।

**विशेषः** भ्राता इति स्थाने अग्रज – अनुज शब्दयोः पाठनं सुकरम् ।

**<u>पाठबिन्दुः</u> – कति – कियतोः भेदः ।**

**पाठ्योपकरणानि –**

**पाठनक्रमः** –

**उपस्थापनम्** – कति इत्यस्य पुनःस्मारणं करणीयम् ।

यथा – पाण्डवाः पञ्च जनाः । पाण्डवाः कति जनाः ?

सप्ताहे सप्त दिनानि । सप्ताहे कति दिनानि ?

एवं प्रश्नकरणेन यदा छात्राः प्रश्नः 'कति' इत्येतत् सम्यक् स्मरन्ति, तदा 'चषके स्वल्पं जलम् अस्ति' इति वाक्यम् उक्त्वा 'एतस्य उत्तरवाक्यस्य प्रश्नं कुर्वन्तु' इति वक्तव्यम् । ततः 'चषके कियत् जलम् अस्ति ?' – इति प्रश्नकरणेन उस्थापनं करणीयम् ।

**अभ्यासः** – अध्यापकः परिमाणवाचकानि एव वाक्यानि वदेत् । छात्राः कियत् इति पदम् उपयुज्य प्रश्नं कुर्युः ।

यथा – अध्यापकः – सरोवरे अपारं जलम् अस्ति ।

छात्राः – सरोवरे कियत् जलम् अस्ति ?

**प्रयोगः** – शिक्षकः उत्तरवाक्यानि वदति । तत् श्रुत्वा छात्राः कति-कियतोः अन्यतरस्य उपयोगं कृत्वा प्रश्नवाक्यं वदेयुः ।

यथा – शिक्षकः – समुद्रे बहु जलम् अस्ति ।

छात्राः – समुद्रे कियत् जलम् अस्ति ?

शिक्षकः – विद्यालये ३० शिक्षिकाः सन्ति ।

छात्राः – विद्यालये कति शिक्षिकाः सन्ति ?

**अवधातव्यः अंशः** – कियान्, कियती, कियत् – इति त्रिषु लिङ्गेषु अपि कियत्-शब्दस्य प्रयोगः भवति । अत्र तु नपुंसकः एव शब्दः बोध्यते ।

## सम्भाषणम्

### पुष्पक्रीणनम्

**शिवाङ्गः -** नमस्ते, मोहनलाल ! पुष्पाणि आगतानि वा ?
**मोहनलालः -** नमस्ते बन्धो ! आगच्छतु । पुष्पाणि आगतानि।
**शिवाङ्गः -** कानि पुष्पाणि सन्ति ?
**मोहनलालः -** अद्य तु पाटलपुष्पाणि , बकुलपुष्पाणि, कमलपुष्पाणि, चंपकपुष्पाणि च सन्ति ।
**शिवाङ्गः -** पाटलपुष्पाणां प्रतिकिलो कियत् मूल्यम् ?
**मोहनलालः -** पञ्चाशत् रूप्यकाणि प्रतिकिलो ।
**शिवाङ्गः -** अद्य अधिकं मूल्यम् अस्ति । एककिलो ददातु । भोः कमलपुष्पाणि कति रूप्यकाणि ?
**मोहनलालः -** एकस्य कमलपुष्पस्य पञ्चरूप्यकाणि ।
**शिवाङ्गः -** पञ्च कमलपुष्पाणि ददातु ।
**मोहनलालः -** दश कमलानि नयतु । अहं प्रतिकमलं त्रीणि रूप्यकाणि स्वीकरिष्यामि ।
**शिवाङ्गः -** तथास्तु । स्वीकरोतु , अशीतिः रूप्यकाणि पञ्चाशत् पाटलपुष्पाणां च त्रिंशत् कमलपुष्पाणाम् ।
**मोहनलालः -** भवतः गणना उत्तमा अस्ति । स्वीकरोतु पुष्पाणि ।
**शिवाङ्गः -** धन्यवादः
**मोहनलालः -** धन्यवादः । पुनः आगच्छतु ।

# स्वाध्यायः

*    कति / कियत् इत्यस्य उपयोगेन प्रश्नार्थवाक्यानि लिखन्तु ।

## कति

१. सप्ताहे सप्त दिनानि भवन्ति ।    ............................................................ ।
२. रावणस्य दश मुखानि सन्ति ।    ............................................................ ।
३. विष्णोः चतस्रः भुजाः सन्ति ।    ............................................................ ।
४. शिवस्य त्रीणि नेत्राणि सन्ति ।    ............................................................ ।
५. वर्षे द्वादशमासाः भवन्ति ।    ............................................................ ।

## कियत्

१. नद्यां बहु जलम् अस्ति ।    ............................................................ ।
२. भीमः बहु भोजनं करोति ।    ............................................................ ।
३. पात्रे लिटरपरिमितं मृत्तैलम् अस्ति । ............................................................ ।
४. चषके अर्धलिटरपरिमितं दुग्धम् अस्ति । ............................................................ ।
५. एतस्य पुस्तकस्य शतरूप्यकाणि मूल्यम् अस्ति । ...................................................... ।

# षष्ठं सोपानम्

## * अव्ययानि

यत्र - तत्र
यद्यपि - तथापि
चेत् - नोचेत्
यावत् - तावत्

**पाठबिन्दुः - यत्र - तत्र**

**पाठनक्रमः-**

**उपस्थापनम्** – यत्र शर्करा अस्ति तत्र पिपीलिकाः सन्ति।

यत्र मन्दिरं भवति तत्र भक्ताः गच्छन्ति। – इत्यादिवाक्यानां द्वारा उपस्थापनं करणीयम्।

**अभ्यासः** – अध्यापकः वाक्यद्वयं वदति, छात्राः 'यत्र – तत्र' पदे योजयित्वा अखण्डं वाक्यं वदन्ति।

यथा – शिक्षकः मन्दिरम् अस्ति, भक्ताः सन्ति।

छात्राः – यत्र मन्दिरम् अस्ति तत्र भक्ताः सन्ति।

प्रयोगः– स्वजीवनसम्बन्धिवाक्येषु 'यत्र – तत्र' पदयुगलं योजयित्वा वाक्यानि वदेयुः।

यथा – मम पितामही यत्र तिष्ठति तत्र आनन्दमयः परिसरः भवति।

पूर्वं मम गृहस्य पुरतः यत्र वाटिका आसीत् तत्र इदानीं सा नास्ति।

**पाठबिन्दुः - यद्यपि - तथापि**

**पाठ्योपकरणम् –**

**पाठनक्रमः** –

**उपस्थापनम्** – यद्यपि मम उदरं पूर्णं, तथापि एकं मधुरं खादामि।

यद्यपि तस्य दन्ताः न सन्ति, तथापि शष्कुलीं खादति।

यद्यपि पिपासा नास्ति, तथापि जलं पिबामि। – इत्यादिवाक्यानां द्वारा उपस्थापनं करणीयम्।

**अभ्यासः** – शिक्षकः वाक्यद्वयं वदति। छात्राः 'यद्यपि – तथापि' योजयित्वा वाक्यं वदन्ति।

यथा – शिक्षकः – शिरोवेदना अस्ति। विद्यालयं गच्छामि।

छात्राः – यद्यपि शिरोवेदना अस्ति, तथापि विद्यालयं गच्छामि।

शिक्षकः – प्रकाशः सम्यक् पठितवान्। अनुत्तीर्णः अभवत्।

छात्राः – यद्यपि प्रकाशः सम्यक् पठितवान्, तथापि अनुत्तीर्णः अभवत्।

**प्रयोगः** – छात्राः एतादृशानि वाक्यानि स्वतन्त्रतया वदेयुः।

**अवधातव्यः अंशः** – 'तथापि' इति उच्चारणसमये 'यद्यपि' साम्यवशात् 'तद्यपि' इति उच्चारणसम्भवः अस्ति। सः दोषः परिहरणीयः।

**पाठबिन्दुः चेत्, नो चेत्**

**पाठनक्रमः-**

**उपस्थापनम्** – समयः अस्ति चेत् आगच्छतु। नो चेत् मास्तु।

विद्युत् अस्ति चेत् दीपः ज्वलति। नो चेत् नास्ति। – इत्यादिवाक्यानां द्वारा उपस्थापनं करणीयम्।

**अभ्यासः** – शिक्षकः पृच्छति – 'धनं नास्ति चेत् भवान् किं करोति ?' छात्राः विविधानि उत्तराणि वदन्ति। एतादृशाः अन्ये अपि प्रश्नाः प्रष्टव्याः।

**अवधातव्याः अंशाः** – 'यदि – तर्हि' इत्यनयोः युगलस्य, 'चेत्' इत्यस्य च अर्थः समानः। व्यवहारयोग्यतां मनसि निधाय एतदपि अव्ययं पाठ्यते।

**विशेषः** – न चेत्, न हि चेत् -इत्यादयः अपि नो चेत् इत्सस्य स्थाने प्रयुज्यन्ते।

**पाठबिन्दुः - यावत् - तावत्**

**पाठनक्रमः** –

**उपस्थापनम्** – १. द्रोण्यां यावत् जलम् अस्ति तावत् चषके नास्ति।

२. कर्णाटकं यावत् विशालं अस्ति केरलं तावत् विशालं नास्ति। – इत्यादिवाक्यानां द्वारा उपस्थापनं करणीयम्।

**अभ्यासः** – शिक्षकः त्रीणि पदानि वदेत्। तदाधारेण छात्राः वाक्यानि वदेयुः। यथा-

शिक्षकः – पाण्डित्यं — रामः – कृष्णः

छात्राः – यावत् पाण्डित्यं रामे अस्ति तावत् कृष्णे नास्ति।

**प्रयोगः** – एतादृशानि वाक्यानि छात्राः स्वयं वदेयुः।

**अवधातव्यः अंशः** – यावान्, यावती, यावत् – इति त्रिषु लिङ्गेषु अपि अस्य प्रयोगः भवति, विशेषणत्वेन। परन्तु ते अंशाः अत्र न पाठ्यन्ते।

## सम्भाषणम्

**अध्यापकः** - सुप्रभातम् छात्राः । सर्वे गृहकार्यं कृतवन्तः ?

**छात्राः** - आम् , आचार्य !

**ऋषभः** - त्वं किमर्थम् उत्तरं न अयच्छः ?

**ऋषभः** - अहं ह्यः बहिः अगच्छम् । अतः गृहकार्यं न कृतवान् ।

**अध्यापकः** - कुत्र गतवान् ?

**ऋषभः** - अहं गान्धी -आश्रमं गतवान् । तत्र गान्धीजन्मदिवसनिमित्तं भजनस्य कार्यक्रमः आसीत् ।

**अध्यापकः** - भवतु । अद्य पूर्णं करोतु । स्नेहः भवान् जानाति गान्धी-आश्रमः कुत्र अस्ति ?

**स्नेहः** - आम् , आचार्य ! यत्र साभ्रमती प्रवहति ।

**श्रेया** - आचार्य ! अहं वदामि सत्यम् उत्तरम् ?

**अध्यापकः** - वदतु ।

**श्रेया** - यत्र वाडजस्थाने श्मसानम् अस्ति । ततः एकः मार्गः अस्ति । किञ्चित् अग्रे गच्छामः चेत् गान्धी-आश्रमः तत्र अस्ति ।

**अध्यापकः** - उत्तमम् । अधुना यावत् वयं पठितवन्तः तावत् वयम् अभ्यासं कुर्मः नो चेत् घण्टानादः भविष्यति ।

**छात्राः** - आचार्य वयं संस्कृतच्छात्राः स्मः । यद्यपि घण्टानादः भवति तथापि वयं संस्कृतं पठिष्यामः ।

# स्वाध्यायः

* **यत्र - तत्र इत्युप्युज्य वाक्यानि रचयन्तु ।**

१. ............ नार्याः आदरः ............ समृद्धिः ।
२. ............ अग्निः ............ धुमः ।
३. ............ वृक्षः ............ छाया ।
४. ............ मिष्टान्नं ............ मक्षिकाः ।
५. ............ सज्जनता ............ प्रसन्नता ।

* **यद्यपि - तथापि इत्युप्युज्य वाक्यानि रचयन्तु**

१. शिक्षकस्य मस्तके पीडा । पाठयति । ................................................... ।
२. तस्य ज्वरः । औषधं न गृह्णाति । ................................................... ।
३. सः धनिकः । दानं ददाति । ................................................... ।
४. मम बुभुक्षा नास्ति । अहं खादामि । ................................................... ।
५. अहं पिपासुः । जलं न पिबामि । ................................................... ।

* **चेत् - नोचेत् इत्युप्युज्य वाक्यानि रचयन्तु ।**

१. विना शब्दं पठतु ............ , इतः गच्छतु ।
२. कार्यक्रमः समये आरब्धः ............ तिष्ठामि । ............ गृहं गच्छामि ।
३. परिश्रमः करोति ............ फलं प्राप्नोति । ............ न प्राप्नोति ।
४. औषधं गृह्णाति ............ स्वस्थः भवति ।
५. महंशः आगच्छति ............ मां आह्वयतु ।

* **यावत् - तावत् इत्युप्युज्य वाक्यानि रचयन्तु ।**

१. ............ भीमः खादति ............ नकुलः न खादति ।
२. ............ अहं पठामि ............ सः न पठति ।
३. ............ बालिका स्मरति ............ बालकः न स्मरति ।
४. ............ युवकः धावति ............ वृद्धः न धावति ।
५. ............ जलं नर्मदायाम् अस्ति ............ जलं साभ्रमत्यां नास्ति ।

## गीतम् - १

कृत्वा नवदृढ संकल्पं,वितरन्तो नव संदेशम्,
घटयामो नवसंघटनं रचयामो नवमितिहासम्.     . कृत्वा

नवमन्वन्तरशिल्पिनः,राष्ट्रसमुन् नतिकांक्षिणः,
त्यागधनाः कार्यैकरताः,कृतिनिपुणा वयमविष्णाः   .कृत्वा

भेदभावनां निरासयन्तः,दीन-दरिद्रान् समुद्धरन्तः
दुःखवितप्तान् समाश्वन्तः कृतसंकल्पान् सदा स्मरन्तः  ..कृत्वा

प्रगतिपथान्नहिविचलेम,परंपरां संरक्षेम,
समुत्साहिनो निरुद्वेगिनो,नित्यनिरन्तरगतिशीलाः  . .कृत्वा

## गीतम् - २

पठत संस्कृतं , वदत संस्कृतं
लसत संस्कृतं चिरं गृहेगृहे च पुनरपि     ।। पठत.... ।।

ज्ञानवैभवं वेदवाङ्मयं ,
लसति यत्र भवभयापहारि मुनिभिरार्जितम् ।
कीर्तिरार्जिता यस्य प्रणयनात् ,
व्यास-भास-कालिदास-बाण-मुख्यकविभिः ।।     ।। पठत.... ।।

स्थानमूर्जितं यस्य मन्वते,
वाग्विचिन्तका हि वाक्षु यस्य वीक्ष्य मधुरताम् ।
यद्विना जना नैव जानते ,
भारतीय-संस्कृतिं सनातनाभिधां वराम् ।।     ।। पठत.... ।।

जयतु संस्कृतं संस्कृतिस्तथा,
संस्कृतस्य संस्कृतेश्च प्रणयानाच्च मनुकुलम् ।
जयतु संस्कृतं जयतु मनुकुलम् ,
जयतु जयतु संस्कृतं जयतु जयतु मनुकुलम्  ।।     ।। पठत.... ।।

# Sanskrit Curriculum

## Class - 7

# प्रथमं सोपानम्

- *  पुनः स्मारणम्

- *  प्रथमा विभक्तिः ।
  - अकारान्त पुंलिङ्गम् ।
  - आकारान्त स्त्रीलिङ्गम् ।
  - ईकारान्त स्त्रीलिङ्गम् ।
  - अकारान्त नपुंसकलिङ्गम् ।

- *  तत् / एतत् ( सर्वनाम ) पुं , स्त्री, नपुं ।
- *  अस्ति - स्तः - सति
- *  अहम् - आवाम् - वयम्
- *  अस्मि - स्वः - स्मः
- *  त्वम् - युवाम् - यूयम्
  अस्ति - स्थः - स्थ
- *  भवान् - भवन्तौ - भवन्तः
  भवती - भवत्यौ - भवत्यः

<u>प्रथमा विभक्तिः</u> ( त्रिषु वचनेषु )

**उपस्थापनम् –**

एकवचनपाठनाय बहुवचनपाठनाय च यथा उपस्थापनं कृतम् आसीत् तया पद्धत्या एव मध्ये द्विवचनं योजयित्वा उपस्थापनं कर्तव्यम् ।

यथा – बालः – बालौ – बालाः

युवकः – युवकौ – युवकाः

अनेन प्रकारेण क्रमेण अकारान्तपु., आकारान्तस्त्री, इकारान्तस्त्री, अकारान्तनपुं. इत्यादिशब्दानाम् अस्मद्, युष्मद, तत् इत्यादिनां सर्वनाम्नः उपस्थापनं कर्तव्यम् ।

**अभ्यासः** –क्रमशः सर्वेषां शब्दानां सर्वनाम्नः उपस्थापनं कारयित्वा अभ्यासः कारणीयः यथा –

| | | |
|---|---|---|
| सः बालः | तौ बालौ | ते बालाः |
| सः युवकः | तौ युवकौ | ते युवकाः |
| एषः युवकः | एतौ युवकौ | एते युवकाः |
| सा बालिका | ते बालिके | ताः बालिकाः |
| एषा शिक्षिका | एते शिक्षिके | एताः शिक्षिकाः |
| तत् यानम् | ते याने | तानि यानानि |
| एतत् यानम् | एते याने | एतानि यानानि |
| अहं भारतीयः | आवां भारतीयौ | वयं भारतीयाः |
| त्वम् छात्रः | युवाम् छात्रौ | यूयम् छात्राः |
| भवान् लेखकः | भवन्तौ लेखकौ | भवन्तः लेखकाः |
| भवती शिक्षिका | भवत्यौ शिक्षिके | भवत्यः शिक्षिकाः |

**प्रयोगः** – छात्राः सर्वनाम्ना सह शब्दानां उपयोगं कृत्वा अनेकानि वाक्यानि वदेयुः ।

* **वर्तमानकालः (परस्मैपदम्)**

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| अ.पु | ति | तः | अन्ति |
| म.पु | सि | थः | थ |
| उ.पु | मि | वः | मः |

* **पूर्वं पाठितानां क्रियापदानां वर्तमानकाले प्रयोगः।**
पूर्व पठित क्रियापदों का वर्तमानकाल में प्रयोग करें ।

**पाठितानाम् अंशानाम् आधारेण पाठः ।**
**पढाए गए पाठ के आधार पर पाठ ।**

**वर्तमानकालः**

**उपस्थापनम्**

यथा वर्तमानकाले क्रियापदस्य एकवचनं बहुवचनं च पाठयितुम् उपस्थापनं कृतम् आसीत् तथैव द्विवचनस्य उपस्थापनं कुर्वन्तु ।

यथा – पठति – पठतः — पठन्ति

चलति – चलतः – चलन्ति

अन्यपुरुषस्य उपस्थापनं कृत्वा तस्य अभ्यासः प्रयोगश्च कारणीयः । ततः क्रमेण उत्तमपुरुषस्य मध्यमपुरुषस्य च उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

**प्रयोग:** – छात्रा: क्रियापदानां अ.पु., म.पु., उ.पु. सर्वेषां रूपाणि वदेयु: ।

– तत: कर्तु: क्रियापदस्य च संयोजनं कृत्वा वाक्यानि पाठनीयानि यथा–

बाल: पठति – बालौ पठत: – बाला: पठन्ति

त्वं पठसि – युवां पठथ: – यूयं पठथ

अहं पठामि – आवां पठाव: – वयं पठाम:

षष्ठीविभक्ति: (त्रिषु वचनेषु)

**उपस्थापनम्** – षष्ठीविभक्त्या: एकवचनं पाठयितुं यथा उपस्थापनं कृतम् आसीत् स: एव क्रम: द्विवचनस्य बहुवचनस्य च उपस्थापनाय अनुसर्तव्य: ।

यथा – अहं लेखकस्य लेखं पठामि ।

अहं लेखकयो: लेखं पठामि ।

अहं लेखकानां लेखं पठामि ।

तत: अभ्यासक्रमे निश्चितानां शब्दानां क्रमेण उपस्थापनं कृत्वा अभ्यास: कारणीय: ।

**प्रयोग:** – छात्रा: षष्ठ्या: एकवचनस्य, द्विवचनस्य, बहुवचनस्य च अनेकानि वाक्यानि रचयेयु: ।

**विशेष:** – यथा नाम्न: उपस्थापनम् अभ्यासश्च कारित: तथैव सर्वनाम्न: अपि उपस्थापनम् अभ्यासश्च क्रमेण कारणीय:

यथा–

अहं तस्य लेखकस्य लेखं पठामि ।

अहं तयो: लेखकयो: लेखं पठामि ।

अहं तेषां लेखकानां लेखं पठामि ।

पाठ्योपकरणानि अपि एकवचनस्य उपस्थापनाय यथा रचितानि तथैव द्विवचनाय, बहुवचनाय च रचनीयानि ।

## स्वाध्याय

* **उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।**

| उदा. | छात्र | छात्र: | छात्रौ | छात्रा: |
|---|---|---|---|---|
| १. | शिक्षक | ......... | ......... | ......... |
| २. | सैनिक | ......... | ......... | ......... |
| ३. | नृप | ......... | ......... | ......... |
| ४. | कृषक | ......... | ......... | ......... |
| ५. | चालक | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | कन्या | कन्या | कन्ये | कन्याः |
| १. | शिक्षिका | ......... | ......... | ......... |
| २. | गायिका | ......... | ......... | ......... |
| ३. | महिला | ......... | ......... | ......... |
| ४, | नायिका | ......... | ......... | ......... |
| ५. | मापिका | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | नदी | नदी | नद्यौ | नद्यः |
| १. | लेखनी | ......... | ......... | ......... |
| २. | भगिनी | ......... | ......... | ......... |
| ३. | द्रोणी | ......... | ......... | ......... |
| ४, | दर्वी | ......... | ......... | ......... |
| ५. | नगरी | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | फल | फलम् | फले | फलानि |
| १. | द्वार | ......... | ......... | ......... |
| २. | उपनेत्र | ......... | ......... | ......... |
| ३. | वातायन | ......... | ......... | ......... |
| ४. | पुस्तक | ......... | ......... | ......... |
| ५. | व्यजन | ......... | ......... | ......... |

## स्वाध्याय

* **सः - तौ - ते / सा - ते - ताः / तत् - ते- तानि**
**एषः- एतौ - एते / एषा - एते - एताः / एतत् - एते - एतानि**
**इत्येतेषाम् उपयोगं कृत्वा वाक्यानि रचयन्तु । इनका उपयोग कर के वाक्य लिखें ।**

| | | |
|---|---|---|
| १. ......... गजः | ......... गजौ | ......... गजाः |
| २. .........अश्वः | ......... अश्वौ | ......... अश्वाः |
| ३. .........माला | ......... माले | ......... मालाः |
| ४. .........नृत्याङ्गना | ......... नृत्याङ्गने | .........नृत्याङ्गनाः |
| ५. .........सम्मार्जनी | ......... सम्मार्जन्यौ | ......... सम्मार्जन्यः |
| ६. .........राज्ञी | ......... राज्ञौ | ......... राज्ञः |
| ७. .........कृष्णफलकम् | ......... कृष्णफलके | ......... कृष्णफलकानि |
| ८. .........गृहम् | ......... गृहे | ......... गृहाणि |
| ९. .........गृहिणी | ......... गृहिण्यौ | ......... गृहिण्यः |
| १०. .........गायकः | ......... गायकौ | ......... गायकाः |

* **उदाहरणानुगुणं लिखन्तु । उदाहरण अनुसार लिखें ।**

| | | |
|---|---|---|
| १. बालकः अस्ति | बालकौ स्तः | बालकाः सन्ति |
| २. वैज्ञानिकः ......... | ......... ......... | ......... ......... |
| ३. परिचारिका ......... | ......... ......... | ......... ......... |
| ४, ......... ......... | ......... ......... | लेखिकाः ......... |
| ५. ......... ......... | जनन्यौ ......... | ......... ......... |
| ६. कुपी ......... | ......... ......... | ......... ......... |
| ७. यानम् ......... | ......... ......... | ......... ......... |
| ८. ......... ......... | चित्रे ......... | ......... ......... |
| ९. ......... ......... | ......... ......... | उत्पीठिकाः ......... |
| १०. ......... ......... | सोपानानि ......... | ......... ......... |

## स्वाध्याय

* **उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।**

| **उदा.** | <u>**अहम् शिक्षकः**</u> | <u>**आवां शिक्षकौ**</u> | <u>**वयं शिक्षकाः**</u> |
|---|---|---|---|
| १. भारतीय | ......... ......... | ......... ......... | ......... ......... |
| २. गायक | ......... ......... | ......... ......... | ......... ......... |
| ३. कन्या | ......... ......... | ......... ......... | ......... ......... |
| ४. वैद्या | ......... ......... | ......... ......... | ......... ......... |
| ५. अभिनेत्री | ......... ......... | ......... ......... | ......... ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | अहम् वैज्ञानिकः अस्मि | आवां वैज्ञानिकौ स्वः | वयं वैज्ञानिकाः स्मः । |
|---|---|---|---|
| १. लेखक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. श्रमिक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. प्राध्यापिका | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. नर्तकी | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. सेविका | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | त्वं छात्रः | | युवां छात्रौ | | यूयं छात्राः | |
|---|---|---|---|---|---|---|
| १. तरुण | ......... | ......... | ......... | ......... | ......... | ......... |
| २. तृषित | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. बुभुक्षिता | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. गायिका | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. भगिनी | ......... | ......... | ......... | ......... | ......... | ......... |

## स्वाध्याय

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | त्वं छात्रः असि | | | युवां छात्रौ स्थः | | | यूयं छात्राः स्थ | | |
|---|---|---|---|---|---|---|---|---|---|
| १. दास | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| २. आरक्षक | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. अनुजा | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. दासी | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. सखी | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |

- उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | भवान् शिक्षकः अस्ति | | | भवन्तौ शिक्षकौ स्तः | | | भवन्तः शिक्षकाः सन्ति | | |
|---|---|---|---|---|---|---|---|---|---|
| १. देशभक्त | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| २. ज्येष्ठ | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. श्रेष्ठ | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. उन्नत | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. स्थूल | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | भवती शिक्षिका अस्ति | भवत्यौ शिक्षिके स्तः | भवत्यः शिक्षिकाः सन्ति |
|---|---|---|---|
| १. अग्रजा | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. जननी | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. कार्यकर्त्री | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. उन्नता | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. स्थूला | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

## स्वाध्याय

* संपूर्णस्य वर्तमााकालस्य अभ्यासः । संपूर्ण वर्तमााकाल का अभ्यास ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| अ.पु | ति | तः | अन्ति |
| म.पु | सि | थः | थ |
| उ.पु | मि | वः | मः |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | बालकः पठति | बालकौ पठतः | बालकाः पठन्ति |
|---|---|---|---|
| १. नायक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. अर्चक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. महिला | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. नटी | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. विमानम् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | त्वं पठसि | युवां पठथः | यूयं पठथ |
|---|---|---|---|
| १. लिख् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. क्रीड् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. नृत्य | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. खाद् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. युध्य | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

# स्वाध्याय

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान भरें ।

| उदा. | अहं पठामि | आवां पठावः | वयं पठामः |
|---|---|---|---|
| १. लिख् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. क्रीड् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. नृत्य | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. खाद् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. युध्य | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

# बोपदेवः

एकदा बोपदेवः नाम एकः मदमतिः छात्रः गुरुकुले वसति।सः यत् पठति तत् विस्मरति । अन्ये छात्राः तस्य उपहासं कुर्वन्ति । एकदा तस्य गुरुः क्रुद्धः भवति । तं विद्यालयात् बहिः करोति । आत्मसम्मानेन वञ्चितः सः चिन्तयति - "अहं मूर्खः अस्मि, मम भाग्ये विद्या नास्ति ।

सः दुःखितः भवति । अत्र तत्र भ्रमति । एकदा सः मार्गे कूपं पश्यति।तत्र महिलाः जलेन घटान् पूरयति । तत्र स्थित्वा , सः विस्मितः पश्यति । यस्यां शिलायां महिलाः घटं स्थापयति तत्र एकः गर्तः भवति । एतत् दृष्ट्वा सः विचारयति । यदि घटेन शिलाखण्डे गर्तः भवति तर्हि पुनः
पुनः अभ्यासेम मम बुद्धिः तीव्रा भवति एव ।

एतत् विचार्य सः पुनः विद्या अर्थं निश्चयं करोति। दत्तचित्तः भवति। परिश्रमेण पठति । एवं कालेन सः अन्येषां छात्राणां समादरं गुरुजनानां स्नेहं च प्राप्नोति । सन्तोषं च विन्दति ।

एषः महान् पण्डितः लघुसिद्धातकौमुदीनामकं संस्कृतव्याकरणस्य ग्रन्थं रचयति । अनन्तरं सः वरदराजः इति नाम्ना विख्यातः भवति ।

◆ **वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।**
**एकश्चन्द्रतमो हन्ति न हि तारागणोऽपि च ।।**

# द्वितीयं सोपानम्

*　**द्वितीया विभक्तिः ( त्रिषु वचनेषु )**
- अकारान्त पुंलिङ्गम् ।
- आकारान्त स्त्रीलिङ्गम् ।
- ईकारान्त स्त्रीलिङ्गम् ।
- अकारान्त नपुंसकलिङ्गम् ।

*　**तत् / एतत् ( सर्वनाम ) पुं , स्त्री, नपुं ।**

*　**किम् ( सर्वनाम ) पुं , स्त्री, नपुं ।**

*　**अस्मद्**

*　**युष्मद्**

*　**द्वितीयाविभक्तयाः उपयोगेन पाठः श्लोकः च ।**

**द्वितीयाविभक्तिः ( त्रिषु वचनेषु )**

**उपस्थापनम्** –

द्वितीयाविभक्ति – एकवचनं पाठयितुं यथा उपस्थापनं कृतम् आसीत् सः एव क्रमः द्वितीया–द्विवचनस्य, द्वितीया–बहुवचनस्य च उपस्थापनाय अनुसर्तव्यः ।

यथा – अहं ग्रन्थं पठामि ।

अहं ग्रन्थौ पठामि ।

अहं ग्रन्थान् पठामि ।

– अकारान्तपु., आकारान्तस्त्री., ईकारान्तस्त्री., अकारान्तनपु. इत्येतेषां क्रमेण उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

**प्रयोगः** – छात्राः द्वितीयायाः एकवचनस्य, द्विवचनस्य, बहुवचनस्य च अनेकानि वाक्यानि रचयेयुः ।

**विशेषः** – यथा नाम्नः उपस्थापनम् अभ्यासश्च कारितः । तथैव सर्वनाम्नः अपि उपस्थापनम् अभ्यासश्च क्रमेण कारणीयः ।

– पाठ्योपकरणानि अपि एकवचनस्य उपस्थापनाय यथा रचितानि तथैव द्विवचनाय, बहुवचनाय च रचनीयानि ।

# स्वाध्याय

* **द्वितीयाविभक्त्याः उचितेन रूपेण रिक्तस्थानानि पूरयन्तु ।**
द्वितीया विभक्ति के योग्य रूप से रिक्तस्थान भरें ।

| | ए.व | | | द्वि.व | | | ब.व | | |
|---|---|---|---|---|---|---|---|---|---|
| १. बालकः - ग्रन्थ | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| २. शिक्षक - बाल | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. कवि - कविता | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. माता - शाटिका | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. अहं - लेखनी | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ६. भ्राता - भगिनी | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ७. त्वं - फलम् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ८. सः - द्वारम् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ९. अहं - रोटिका | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| १०.अध्यक्ष - विद्यालय | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |

* **अधोदत्तानां द्वितीयान्तरुपैः रिक्तस्थानानि पूरयन्तु । द्वितीयान्त रूपों से रिक्तस्थान भरें ।**

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| उदा सः | तम् | तौ | तान् |
| १. एषः | ......... | ......... | ......... |
| २. सा | ......... | ......... | ......... |
| ३. एषा | ......... | ......... | ......... |
| ४. तत् | ......... | ......... | ......... |
| ५. एतत् | ......... | ......... | ......... |
| ६. कः | ......... | ......... | ......... |
| ७. का | ......... | ......... | ......... |
| ८. किम् | ......... | ......... | ......... |
| ९. त्वम् | ......... | ......... | ......... |
| १०. अहम् | ......... | ......... | ......... |

# स्वाध्याय

* उदाहरणानुगुणं द्वितीयाविभक्त्याः रुपाणि लिखन्तु ।
उदाहरण अनुसार द्वितीया विभक्ति के रूप लिखें ।

| | ( पुं. ) | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | बालक | बालकम् | बालकौ | बालकान् |
| १. | गज | ............ | ............ | ............ |
| २. | ग्रन्थ | ............ | ............ | ............ |
| ३. | देव | ............ | ............ | ............ |
| ४. | अश्व | ............ | ............ | ............ |
| ५. | स्युत | ............ | ............ | ............ |

| | (स्त्री.) | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | बालिका | बालिकाम् | बालिके | बालिकाः |
| १. | शिक्षिका | ............ | ............ | ............ |
| २. | मापिका | ............ | ............ | ............ |
| ३. | छुरिका | ............ | ............ | ............ |
| ४. | गायिका | ............ | ............ | ............ |
| ५. | नायिका | ............ | ............ | ............ |

| | (स्त्री.) | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | नदी | नदीम् | नद्यौ | नद्यः |
| १. | भगिनी | ............ | ............ | ............ |
| २. | कूपी | ............ | ............ | ............ |
| ३. | दर्वी | ............ | ............ | ............ |
| ४. | सम्मार्जनी | ............ | ............ | ............ |
| ५. | चालनी | ............ | ............ | ............ |

| | (नपुं.) | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | फल | फलम् | फले | फलानि |
| १. | उपनेत्र | ............ | ............ | ............ |
| २. | गृह | ............ | ............ | ............ |
| ३. | पुस्तक | ............ | ............ | ............ |
| ४. | यान | ............ | ............ | ............ |
| ५. | दूरदर्शन | ............ | ............ | ............ |

# मम विद्यालयः

एषः अस्माकं विद्यालयः । अस्माकं विद्यालयः विशालः अस्ति । अत्र पञ्चशतं छात्राः पठन्ति। विद्यालयस्य भवान सुदरम् अस्ति। विद्यालयस्य वामतः उद्यानम् अस्ति। दक्षिणतः अपि उद्यानम् अस्ति।
विद्यालयस्य पुरतः ध्वजस्तम्भः अस्ति । विद्यालयस्य पृष्ठतः वृक्षाः सति ।

एषा अस्माकं अध्यापिका रमा । एषा अस्मान् संस्कृतं पाठयति । सा कथां श्रावयति । पाठ्योपकरणानि दर्शयति । सुभाषितानि वाचयति । गीतानि अपि गायति । सम्भाषणम् अपि बोधयति। अस्माकं गणिताध्यापकः उत्तमतया गणितं बोधयति। सः उत्तरकथार्थम् अस्मान् प्रेरयति ।
विनोदकणिकाः उक्त्वा सर्वान् हासयति ।

वयं विद्यालयारम्भे प्रार्थनाश्लोकान् वदामः । ततः प्रमुखवार्ताः श्रृणुमः । अनन्तरं स्वकक्षां गच्छामः । सायं पञ्चवादनपर्यतं वयं पाठान् पठामः । मध्याह्ने भोजनविरामसमये पाथेयं स्वीकुर्मः । सायं वयं क्रीडामः। क्रीडा आनन्दं ददाति । शक्तिम् अपि ददाति । अनुशासनं बोधयति । परस्परमैत्रीं बोधयति । गृहे वयं पाठान् पठामः प्रश्नानाम् उत्तराणि च लिखामः । श्लोकान् कण्ठस्थी कुर्मः । ततः
स्वज्ञानं वर्धयामः । वयम् उत्तमाः छात्राः भविष्यामः ।

◆ **अहिं नृपं च शार्दुलं बालकं च नटीं तथा ।**
**परश्वानं च मूर्खं च सप्तसुप्तान् न बोधयेत् ।।**

# तृतीयं सोपानम्

* तृतीया विभक्तिः ( त्रिषु वचोषु )
  - अकारान्त पुंलिङ्गम् ।
  - आकारान्त स्त्रीलिङ्गम् ।
  - ईकारान्त स्त्रीलिङ्गम् ।
  - अकारान्त नपुंसकलिङ्गम् ।

* साधनम्

* सह

* विना

* तृतीयाविभक्तयाः उपयोगेन पाठः श्लोकः च ।

**तृतीयाविभक्तिः ( त्रिषु वचनेषु )**

**उपस्थापनम् –**

तृतीयाविभक्तेः एकवचनं पाठयितुं यथा उपस्थापनं कृतम् आसीत् तथैव तृतीयाविभक्त्याः द्विवचनस्य, बहुवचनस्य च उपस्थापनं कर्तव्यम् ।

यथा – अहं बालेन सह गच्छामि ।

अहं बालाभ्याम् सह गच्छामि ।

अहं बालैः सह गच्छामि

– अकारान्तपु., आकारान्तस्त्री., ईकारान्तस्त्री., अकारान्तनपु. इत्येतेषां क्रमेण उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

**प्रयोगः** – छात्राः द्वितीयायाः एकवचनस्य, द्विवचनस्य, बहुवचनस्य च अनेकानि वाक्यानि रचयेयुः ।

– क्रमेण साधनयोगे, सहयोगे, विनायोगे तृतीयाविभक्त्याः वाक्याभ्यासः कारणीयः ।

**विशेषः** – यथा नाम्नः उपस्थापनम् अभ्यासश्च कारितः । तथैव सर्वनाम्नः अपि उपस्थापनम् अभ्यासश्च क्रमेण कारणीयः ।

– पाठ्योपकरणानि अपि एकवचनस्य उपस्थापनाय यथा रचितानि तथैव द्विवचनस्य, बहुवचस्य च अभ्यासाय रचनीयानि ।

# स्वाध्याय

* उदाहरणानुगुणं तृतीयाविभक्त्याः रूपाणि लिखतु ।
उदाहरण अनुसार तृतीया विभक्ति के रूप लिखें ।

| ( पुं. ) | | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | बालक | बालकेन | बालकाभ्याम् | बालकैः |
| १. | गज | ………… | ………… | ………… |
| २. | ग्रन्थ | ………… | ………… | ………… |
| ३. | देव | ………… | ………… | ………… |
| ४. | अश्व | ………… | ………… | ………… |
| ५. | स्युत | ………… | ………… | ………… |

| (स्त्री.) | | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | बालिका | बालिकया | बालिकाभ्याम् | बालिकाभिः |
| १. | शिक्षिका | ………… | ………… | ………… |
| २. | मापिका | ………… | ………… | ………… |
| ३. | छुरिका | ………… | ………… | ………… |
| ४. | गायिका | ………… | ………… | ………… |
| ५. | नायिका | ………… | ………… | ………… |

| (स्त्री.) | | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | नदी | नद्या | नदीभ्याम् | नदीभिः |
| १. | भगिनी | ………… | ………… | ………… |
| २. | कूपी | ………… | ………… | ………… |
| ३. | दर्वी | ………… | ………… | ………… |
| ४. | सम्मार्जनी | ………… | ………… | ………… |
| ५. | चालनी | ………… | ………… | ………… |

| (नपुं.) | | ए.व | द्वि.व | ब.व |
|---|---|---|---|---|
| उदा. | फल | फलेन | फलाभ्याम् | फलैः |
| १. | उपनेत्र | ………… | ………… | ………… |
| २. | गृह | ………… | ………… | ………… |
| ३. | पुस्तक | ………… | ………… | ………… |
| ४. | यान | ………… | ………… | ………… |
| ५. | दूरदर्शन | ………… | ………… | ………… |

# स्वाध्याय

*** सह इति उपयुज्य तृतीयाविभक्त्याः उपयोगेन वाक्यानि रचयन्तु ।**
सह का उपयोग कर के तृतीया विभक्ति के वाक्य बनाएँ ।

१. अहं शिक्षकेन सह गच्छामि । ............................................. .................................................
२. ................................. . । बालकः क्रीडकाभ्यां सह क्रीडति .................................................
३. मूषकः अश्वेन सह धावति । ............................................. .................................................
४. ...................................... ............................................. छात्रः गायकैः सह गायति ।
५. ................................. . । नृपः सैनिकाभ्यां सह युध्यति .................................................

१. ...................................... ............................................. अहं शिक्षिकाभिः सह गच्छामि ।
२. ...................................... भगिनी महिलाभ्यां सह नृत्यति .............................................
३.माता पुत्र्या सह पचति । ............................................. .................................................
४. गायकः गायिकया सह गायति । ............................................. .................................................
५. ...................................... ............................................. नार्तकः नर्तकीभ्यः नृत्यति।

*** विना इति उपयुज्य तृतीयाविभक्त्याः उपयोगेन वाक्यानि रचयन्तु ।**
विना का उपयोग कर के तृतीया विभक्ति के वाक्य बााएँ ।

१. बालकः लेखन्या विना लिखति। ............................................. .................................................
२. ................................. . । गायिका गायकाभ्यां विाा गायति .................................................
३. नृपः सैनिकेन विना न युध्यति । ............................................. .................................................
४. ...................................... ............................................. जननी पुत्रीभिः विना न खादति ।
५. ................................. . । सः अग्रजाभ्यां विाा ा गच्छति .................................................
६. ...................................... ............................................. छात्राः शिक्षिकाभिः विना न पठति ।
७. ...................................... मित्रं मित्राभ्यां विना न क्रीडति .............................................
८. अहं पुस्तकेन विना न पठामि । ............................................. .................................................

*** तृतीयाविभक्त्यतरूपस्य योग्यवचनोपयोगेन वाक्यानि रचयन्तु ।**
तृतीया विभक्त्यत रूपों का उपयोग कर के वाक्य बााएँ ।

१. यान ............................................................... ।
२. कर्णौ ............................................................... ।
३. पादाः ............................................................... ।
४. नेत्रे ............................................................... ।
५. दण्ड ............................................................... ।
६. नासिका ............................................................... ।
७. अङ्कनी ............................................................... ।
८. उपनेत्र ............................................................... ।

# श्रद्धा

सज्जनाः कथयन्ति यत् - श्रद्धया विना कार्यं न सम्भवति । अत्र श्रद्धाम् अनुलक्ष्य एकः प्रसङ्गः वर्णितः अस्ति । आगच्छन्तु एतेन प्रसङ्गेन किमपि अवगन्तुं प्रयत्नं कुर्मः ।

एकस्मिन् वर्षे नगरे दुर्भिक्षः आसीत् । वर्षायाः एकमपि लक्षणं न दृश्यते स्म । जलेन विना सर्वत्र हाहाकारः । पेयजलस्य अपि समस्या आसीत् । कृषिकार्यस्य कः विषयः । जनाःवर्षायै बहुविघान् प्रयोगाान् कृतवतः किन्तु बहुविधैः प्रयोगैः अपि वर्षानाभवत् ।

ततः कश्चन् पण्डितः देवयज्ञं कर्तुम् असूचयत् । देवयज्ञेन अवश्यमेव वर्षा भविष्यति इति तस्य चिन्तनम् आसीत् । ग्रामीणाः यज्ञं कर्तुम् एकत्रिताः । तत्र एका बालिका जनकेन सह यज्ञस्थानम् आगच्छत् । तया यदा ज्ञातं यज्ञेन वर्षा भविष्यति तदा सा शीघ्रं गृहं प्रत्यागतवती । गृहात् छत्रं च स्वीकृत्य पुनः यज्ञस्थानं गतवती । छत्रेण सह उपस्थितां कन्यां दृष्ट्वा सर्वे हासं कृतवन्तः ।

यदा कन्यायाः पिता ताम् पृष्टवान् - "त्वं किमर्थं छत्रम् आनीतवती ? वर्षा कुत्र अस्ति ?" तदा कया श्रद्धया अवदत् - "पण्डितमहोदयेन उक्तं खलु यज्ञेन वर्षा भविष्यति अत्र यज्ञकार्यं प्रचलति अतः अहं छत्रं गृहित्वा आगतवती "

बालिकायाः श्रद्धां दृष्ट्वा सर्वे स्वक्षतिं ज्ञातवतः । तत्र सर्वे यज्ञं कर्तुं उपस्थिताः आसन् किन्तु यज्ञेन वर्षा भविष्यति इति कस्यापि श्रद्धा न आसीत् । किन्तु बालिकायाः यज्ञे श्रद्धा आसीत् । बालिकायाः श्रद्धया एव यज्ञकार्यानन्तरं तत्क्षणं मेघराजः अवर्षत् । मेघराजस्य आगमनेन जनाः सन्तोषं अनुभूतवन्तः ।

अतः सत्यमेव उच्यते यत् - " श्रद्धया कृतं कार्यम् अवश्यमेव सिद्ध्यति इति ।"

* **गन्धेन हीनं सुमनं न शोभते,**
**दन्तैर्विहीनं वदनं न भाति ।**
**सत्येन हीनं वचनं न दीप्यते,**
**पुण्येन हीनः पुरुषो जघन्यः ।।**

# चतुर्थ सोपानम्

* आज्ञार्थः ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| अ.पु | तु | ताम् | अन्तु |
| म.पु | - | तम् | त |
| उ.पु | आनि | आव | आम |

* सम्बोधनम् ।
- अकारान्त पुंलिङ्गम् ।
- आकारान्त स्त्रीलिङ्गम् ।
- ईकारान्त स्त्रीलिङ्गम् ।
- अकारान्त नपुंसकलिङ्गम् ।

* **पाठितानाम् अंशानाम् आधारेण पाठः ।**
**पढाए गए पाठ के आधार पर पाठ ।**

**<u>आज्ञार्थ</u>**

**उपस्थापनम्** –

– आज्ञार्थस्य एकवचनस्य बहुवचनस्य च अभ्यासः अस्माभिः पूर्वं कारितः वर्तते । तेन एव क्रमेण आज्ञार्थद्विवचनस्य उपस्थापनं कारणीयम् ।

यथा – पठतु – पठताम् – पठन्तु

वदतु – वदताम् – वदन्तु

– आज्ञार्थस्य अन्यपुरुषस्य उपस्थापनं कृत्वा अभ्यासः कारणीयः ततः क्रमेण मध्यमपुरुषस्य उत्तमपुरुषस्य च उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

**प्रयोगः** – छात्राः आज्ञार्थस्य अ.पु., म.पु., उ.पु. सर्वेषां रूपाणि वदेयुः ।

**विशेषः** – आज्ञार्थस्य रूपाणि पाठयित्वा क्रमेण अकारान्तपु., आकारान्तस्त्री, अकारान्तनपु., शब्दानां सम्बोधनरूपैः सह आज्ञार्थस्य प्रयोगः कारणीयः यथा–

हे छात्र ! पठतु ।

हे छात्रौ ! पठताम् ।

हे छात्राः ! पठन्तु ।

हे कवे ! लिखतु ।

के कवी ! लिखताम् ।

हे कवयः ! लिखन्तु ।

# स्वाध्याय

* अधोप्रदत्तानां क्रियापदानां यथोचित्तं परिवर्तनं कुर्वन्तु ।
क्रियापदों का यथोचित्त परिवर्तन करें ।

उदा. सः पठति । सः पठतु ।

१. ते रमन्ति । ------------------ ।
२. युवां गच्छथ । ------------------ ।
३. नर्तक्यः नृत्यन्ति । ------------------ ।
४. अहम् आगच्छामि । ------------------ ।
५. यूयं स्मरथ । ------------------ ।
६. तौ वदतः । ------------------ ।
७. त्वं चलसि । ------------------ ।
८. अध्यापकः पाठयति । ------------------ ।
९. वयम् अर्चामः । ------------------ ।
१०. आवां खादावः । ------------------ ।

# स्वाध्याय

* संपूर्णस्य आज्ञार्थस्य अभ्यासः । संपूर्ण आज्ञार्थ का अभ्यास ।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| अ.पु | तु | ताम् | अन्तु |
| म.पु | - | तम् | त |
| उ.पु | आनि | आव | आम |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान पूरें ।

| उदा. | बालकः पठतु | बालकौ पठताम् | बालकाः पठन्तु |
|---|---|---|---|
| १. नायक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| २. अर्चक | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ३. महिला | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ४. नटी | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |
| ५. विमानम् | ......... ......... ......... | ......... ......... ......... | ......... ......... ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान पूरें ।

| उदा. | त्वं पठ | | | युवां पठतम् | | | यूयं पठत | | |
|---|---|---|---|---|---|---|---|---|---|
| १. लिख् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| २. क्रीड् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. नृत्य | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. खाद् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. युध्य | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |

* उदाहरणानुगुणं रिक्तस्थानानि पूरयन्तु । उदाहरण अनुसार रिक्तस्थान पूरें ।

| उदा. | अहं पठानि | | | आवां पठाव | | | वयं पठाम | | |
|---|---|---|---|---|---|---|---|---|---|
| १. लिख् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| २. क्रीड् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ३. नृत्य | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ४. खाद् | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |
| ५. युध्य | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... | ......... |

## स्वाध्याय

* उदाहरणानुगुणं सम्बोधनरूपाणि लिखन्तु ।

| उदा. | छात्र | छात्र | छात्रौ | छात्राः |
|---|---|---|---|---|
| १. | शिक्षक | ......... | ......... | ......... |
| २. | सैनिक | ......... | ......... | ......... |
| ३. | नृप | ......... | ......... | ......... |
| ४. | कृषक | ......... | ......... | ......... |
| ५. | चालक | ......... | ......... | ......... |

| उदा. | कन्या | कन्ये | कन्ये | कन्याः |
|---|---|---|---|---|
| १. | शिक्षिका | ......... | ......... | ......... |
| २. | गायिका | ......... | ......... | ......... |
| ३. | महिला | ......... | ......... | ......... |
| ४, | नायिका | ......... | ......... | ......... |
| ५. | मापिका | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | नदी | नदि | नद्यौ | नद्यः |
| १. | लेखनी | ......... | ......... | ......... |
| २. | भगिनी | ......... | ......... | ......... |
| ३. | द्रोणी | ......... | ......... | ......... |
| ४, | दर्वी | ......... | ......... | ......... |
| ५. | नगरी | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | फल | फल | फले | फलानि |
| १. | द्वार | ......... | ......... | ......... |
| २. | उपनेत्र | ......... | ......... | ......... |
| ३. | वातायन | ......... | ......... | ......... |
| ४. | पुस्तक | ......... | ......... | ......... |
| ५. | व्यजन | ......... | ......... | ......... |

## वृद्धमन्त्री उपदेशः

सिंहासनम् आरोढुं सन्नद्धं राजकुमारं वृद्धमत्री उपादिशत् । वत्स ! राजकुमार ! गुरुकुले त्वम् आचार्यमुखात् सर्वं ज्ञानं श्रुतवान् असि । तथापि कर्तव्यबुद्ध्या किञ्चित् अहम् उपदिशामि।
ध्यानेन श्रुणु । अधिकारमदः धनमदः च नृपं मार्गभ्रष्टं करोति । अतः त्वं जागरूको भव ।

स्वार्थसंपादकाः त्वां परितः भविष्यति । तान् उपायेन निवारय । सज्जनाः अर्हाः च पर्णान्तरितफलानि इव दूरे तिष्ठति । तान् अन्विष्य पोषय । अर्हान् पुरस्कुरु । दण्ड्यान् दण्डय ।
अधीनेषु नियमपालनविषये कठोरो भव । साहाय्यकरणे मृदुताम् आचर । गुरूजनान् आदरेण पश्य । मुनिजनान् भक्त्या नमस्कुरु।ज्ञानवृद्धान् विनयेन प्रणम। बाधवान् अनुचिते स्थाने मा प्रतिष्ठापय । अर्हजनान् उच्चस्थाने नियोजय । पक्षपातं कदापि मा कुरु । उपनिषदः उपदेशान् सदा स्मर ।
सत्यं वद।धर्मं चर। स्वाध्यायान् मा प्रमदः। मातृदेवो भव । पितृदेवो भव। आचार्यदेवो भव । अतिथिदेवो भव। इति वदति उपनिषदः। अन्यदपि अहं वदामि -"राष्ट्रदेवो भव । समाजसेवको भव । लोकपूजको भव । दीनोद्धारको भव इति ।"

सर्वं ज्ञातवतं भवन्तम् इतः अपि अधिकं किम् उपदिशानि ? प्रजाः पुत्रवत् पालय ।
विजयी भव । दिग्विजयी भव ।

# पञ्चमं सोपानम्

*  **चतुर्थीविभक्तिप्रयोगाः (निश्चिताः अंशाः)**
दानार्थे [यच्छति - ददाति ]
रोचते प्रयोगे
नमः प्रयोगे
तादर्थ्ये चतुर्थी [आनयति - क्रीणाति]
क्रुध्यति - ईर्ष्यति - द्रुह्यति - असूयति

*  **पाठितानाम् अंशानाम् आधारेण पाठः ।**
**पढाए गए पाठ के आधार पर पाठ ।**

**<u>चतुर्थीविभक्तिः</u> ( त्रिषु वचनेषु )**

**उपस्थापनम्** –

– एकस्मै बालाय पुस्तकं दत्त्वा 'अहं बालाय पुस्तकं ददामि' इति उपस्थापनं कर्तव्यम् । 'अहं युवकाय फलं ददामि' अनेन प्रकारेण कतिपय वाक्यानि उक्त्वा उपस्थापनं कर्तव्यम् । पूर्वं चतुर्थी एकवचनस्य प्रयोगः पाठितः वर्तते । तदाधारेण द्विवचनस्य, बहुवचनस्य च उपस्थापनं कर्तव्यम् । यथा–
अहं बालाय पुस्तकं ददामि ।
अहं बालाभ्याम् पुस्तकं ददामि ।
अहं बालेभ्यः पुस्तकं ददामि ।

– अनेन प्रकारेण अकारान्तपु., आकारान्तस्त्री., ईकारान्तस्त्री., अकारान्तनपु. इत्येतेषां क्रमेण उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

**प्रयोगः** –

– छात्राः चतुर्थी–एकवचनस्य, द्विवचनस्य, बहुवचनस्य च अनेकानि वाक्यानि वदेयुः
– क्रमेण चतुर्थ्याः रोचते, नमः, तादर्थेः, क्रुद्धयति/कुप्यति, ईर्ष्यति, द्रुह्यति, असूयति इत्यादिनाम् उपस्थापनं कृत्वा अभ्यासः कारणीयः ।

# स्वाध्याय

* **चतुर्थीविभक्तियाः उपयोगेन रिक्तस्थानानि पूरयन्तु ।**

१. बालकः ............... पुस्तकं ददाति । ( शिक्षक )
२. नृपः ............... दानं यच्छति । (भिक्षुकाः )
३. पिता ............... उपहारं ददाति । (कन्या )
४. वैद्यः ............... औषधं ददाति । ( रुग्णौ )
५. बालकाः ............... पुष्पाणि यच्छन्ति । ( शिक्षिके )
६. भ्राता ............... शाटिकां यच्छति । (भगिनी )
७. सर्वकारः ............... अधिकारं ददाति । (महिलाः)
८. स्वामी ............... वेतनं यच्छति । (सेवकः )
९. माता ............... अल्पाहारं ददाति । (पुत्र्यौ )
१०. शिक्षकः ............... प्रश्नपत्रं यच्छति । ( छात्राः )

* **कस्मै / कस्यै किं रोचते इति लिखन्तु ।**

१. बालक - मधुरम् ........................................................ ।
२. महिला - शाटिका ........................................................ ।
३. वृद्ध - देवदर्शनम् ........................................................ ।
४. युवती - पाककार्यम् ........................................................ ।
५. अहम् - संस्कृतम् ........................................................ ।
६. सः - भ्रमणम् ........................................................ ।
७. सा - गानम् ........................................................ ।
८. एषः - सम्भाषणम् ........................................................ ।
९. एषा - पठनम् ........................................................ ।
१०. शिक्षक - पाठनम् ........................................................ ।

* **कः का कस्मै कस्यै क्रुध्यति , असूयति , ईर्ष्यति, द्रुह्यति इति लिखन्तु ।**

१. चाणक्यः - चन्द्रगुप्त - क्रुध्यति ........................................................ ।
२. दुर्जनः - सज्जन - ईर्ष्यति ........................................................ ।
३. निर्धनः - धनिक - असूयति ........................................................ ।
४. रावणः - राम - द्रुह्यति ........................................................ ।
५. पिता - पुत्री - क्रुध्यति ........................................................ ।
६. गायिका - गायिका - ईर्ष्यति ........................................................ ।
७. भ्राता - भगिनी - असूयति ........................................................ ।

- उदाहरणानुगुणं चतुर्थीविभक्त्याः रूपाणि लिखन्तु ।

| | | | | |
|---|---|---|---|---|
| उदा. | छात्र | छात्राय | छात्राभ्याम् | छात्रेभ्यः |
| १. | शिक्षक | ......... | ......... | ......... |
| २. | सैनिक | ......... | ......... | ......... |
| ३. | नृप | ......... | ......... | ......... |
| ४. | कृषक | ......... | ......... | ......... |
| ५. | चालक | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | कन्या | कन्यायै | कन्याभ्याम् | कन्याभ्यः |
| १. | शिक्षिका | ......... | ......... | ......... |
| २. | गायिका | ......... | ......... | ......... |
| ३. | महिला | ......... | ......... | ......... |
| ४, | नायिका | ......... | ......... | ......... |
| ५. | मापिका | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | नदी | नद्यै | नदीभ्याम् | नदीभ्यः |
| १. | लेखनी | ......... | ......... | ......... |
| २. | भगिनी | ......... | ......... | ......... |
| ३. | द्रोणी | ......... | ......... | ......... |
| ४, | दर्वी | ......... | ......... | ......... |
| ५. | नगरी | ......... | ......... | ......... |

| | | | | |
|---|---|---|---|---|
| उदा. | फल | फलाय | फलाभ्याम् | फलेभ्यः |
| १. | द्वार | ......... | ......... | ......... |
| २. | उपनेत्र | ......... | ......... | ......... |
| ३. | वातायन | ......... | ......... | ......... |
| ४. | पुस्तक | ......... | ......... | ......... |
| ५. | व्यजन | ......... | ......... | ......... |

# उज्जयिनी नगरी

उज्जयिनी नगरी एका प्राचीनतमा अस्ति । विक्रमादित्यस्य शासिता इयं नगरी । अत्र विश्वप्रसिद्धं महाकालमन्दिरम् अस्ति । प्रतिदिनं बहवः भारतीयाः यात्रिकाः अत्र महाकालदर्शनाय आगच्छन्ति । विदेशीयाः जनाः अपि भ्रमणाय, महाकालदर्शनाय, क्षिप्रा दर्शनाय, शिक्षायै, अनुसन्धानाय च उज्जयिनीम् आगच्छन्ति । भक्ताः, साधकाः, दार्शनिकाः च ये उज्जयिनीम् आगच्छन्ति ते प्रथमं क्षिप्रास्नानं कुर्वन्ति । स्नानं कृत्वा ते महाकालस्य दर्शनाय मन्दिरं प्रविशन्ति । सर्वे "ॐ महाकालाय नमः" , "ॐ नमः शिवाय" च इति उक्त्वा शिवलिङ्गं स्पृशन्ति । शिवलिङ्गाय बिल्वपत्रं, पुष्पं, दुग्धं, चन्दनं च अर्पयन्ति । अर्चकः भक्तेभ्यः प्रसादं पादोदकं च ददाति । भक्ताः अपि पूजकाय दक्षिणां यच्छन्ति । भिक्षुकाय अपि दानं यच्छन्ति ।

कालभैरवः अपि अत्र अस्ति । तत्रापि भक्ताः, साधकाः, उपासकाः च दर्शनाय उपासनायै च गच्छन्ति । महाकविकालिदासस्य अपि एतत् आश्रयस्थानम् । कालिदासः संस्कृताय महद्योगदानम् अकरोत् । पर्यटकेभ्यः उज्जयिनी अतीव रोचते ।

अत्र पवित्रे स्थाने न कोऽपि कस्मै अपि क्रुध्यति , असूयति , ईर्ष्यति, द्रुह्यति ।

* परोपकाराय वहन्ति नद्यः परोपकाराय दुहन्ति गावः ।
परोपकाराय फलन्ति वृक्षाः परोपकाराय सतां विभूतयः ।।

# षष्ठं सोपानम्

* ह्यस्तनभूतकालः

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| अ.पु | अ_त् | अ_ताम् | अ_अन् |
| म.पु | अ_ः | अ_तम् | अ_त |
| उ.पु | अ_अम् | अ_आव | अ_आम |

* क्तवतु
पठितवान् - पठितवन्तौ - पठितवन्तः
पठितवती - पठितवत्यौ - पठितवत्यः

* स्म प्रयोगः

* पाठितानाम् अंशानाम् आधारेण पाठः ।
पढाए गए पाठ के आधार पर पाठ ।

**ह्यस्तनभूतकालः ( त्रिषु वचनेषु )**

**उपस्थापनम्** –

- शिक्षकः 'बालः गच्छति' इति वर्तमानकालस्य वाक्यम् उक्त्वा बहिः प्रेषयित्वा 'बालः अगच्छत्' इति उक्त्वा उपस्थापनं कुर्यात् । ततः बालः अपठत् । युवकः अखादत् । इत्यादिनि उदाहरणानि उक्त्वा अन्यानि वाक्यानि वाचनीयानि ।
